ગુજરાત રાજ્યના શિક્ષણવિભાગના પત્ર-ક્રમાંક
મશક / 1013 / 175 / છ, તા. 3-4-2013 - થી મંજૂર

# SANSKRIT

## Standard 9

**प्रतिज्ञापत्रम्**

भारतं मम देशः ।
सर्वे भारतीयाः मम भ्रातरः भगिन्यः च सन्ति ।
मम मानसे देशस्पृहा अस्ति । समृद्धिसहितं
विविधतापरिपूर्णं तस्य संस्कृतिगौरवम् अनुभवामि ।
अहं सदा तत्पात्रं भवितुं यत्नं करिष्यामि ।
अहं मम पितरौ आचार्यान् गुरुजनान् च प्रति
आदरभावं धारयिष्यामि ।
प्रत्येकेन सह शिष्टव्यवहारं च करिष्यामि ।
अहं मम देशाय देशबान्धवेभ्यः च मम निष्ठाम् अर्पयामि ।
तेषां कल्याणे समृद्धौ च एव मम सुखम् अस्ति ।

રાજ્ય સરકારની વિનામૂલ્યે યોજના હેઠળનું પુસ્તક

**Gujarat State Board of School Textbooks**
**'Vidyayan', Sector 10-A, Gandhinagar-382 010**

© Gujarat State Board of School Textbooks, Gandhinagar
Copyright of this textbook is reserved by Gujarat State Board of School Textbooks. No reproduction of any part of the textbook in any form is permitted without written permission of the Director of the Board.

**Authors**

Shri Sureshchandra J. Dave

**Authors**

Dr. Kamleshkumar C. Chokshi (Convenor)

Dr. Manshukh K. Moliya

Dr. Mohini D. Acharya

Shri Poornima L. Dave

Shri Maharudra K. Sharma

Shri Smitaben B. Joshi

**Translation**

Dr. Indira Nityanand

Shri Poornima L. Dave

**Reviewers**

Dr. Jayntilal K. Bhatt

Dr. Ramchandrabhai G. Prajapati

Shri Rohitbhai J. Khamar

Shri Harsha B. Mehta

Shri Vishnuprashad R. Suthar

**Artist**

Shri Ankur Soochak

**Co-Ordinator**

Dr. Krishna Dave
(Subject Co-ordinator : English)

**Preparation and Planning**

Shri Haren Shah
(Dy. Director : Academic)

**Lay-out and Planning**

Shri Haresh S. Limbachiya
(Dy. Director : Production)

## PREFACE

In accordance with NCERT as well as NCF-2005, it has been necessary to bring change in new national curriculum, textbook and educational process. In that connection Gujarat State Secondary and Higher Secondary Board have prepared a new curriculum. With a feeling of pleasure, the Board presents this textbook to the students which is prepared according to the new syllabus of **Sanskrit** for **Standard 9** and approved by the Government of Gujarat.

In this textbook, linguistic, literary and cultural aspects of Sanskrit have been taken care of. Wherever necessary, considering the age group of the students some lessons have been edited and some new lessons have been written. Sanskrit conversational aspects are also covered. All the (grammatical) terms are discussed in detail to get familiar with Sanskrit language. Various aspects of Sanskrit literature have been represented here. This textbook has been prepared with a vision to develop creativity, thinking power and reasoning ability in students which can lead them to their overall development and it can help in teaching-learning process too.

Before publishing this textbook, its manuscript has been reviewed with different points of view by the teachers teaching at this level and the subject experts. This textbook has been published only after incorporating the suggestions and corrections in the manuscript suggested by the teachers and experts. We acknowledge the contribution of all those who have put in ceaseless efforts and extended full co-operation in bringing out this textbook.

With a view to making this textbook interesting, useful and errorfree, the textbook board has taken every care. However, in order to improve upon the quality of this textbook, we welcome useful suggestions from all those interested in education

**P. bharathi (IAS)**

Director — Executive President

Date : 13-12-2019 — Gandhinagar

First Edition : 2013, Reprint : 2016, 2017, 2018, 2019, 2020

**Published by** : P. Bharathi, Director, on behalf of Gujarat State Board of School Textbooks, 'Vidhyayn', Sector 10-A, Gandhinagar.

**Printed by** :

# FUNDAMENTAL DUTIES

**It shall be the duty of every citizen of India**

**(A)** to abide by the Constitution and respect its ideals and institutions, the National Flag and the National Anthem;

**(B)** to cherish and follow the noble ideals which inspired our national struggle for freedom;

**(C)** to uphold and protect the sovereignty, unity and integrity of India;

**(D)** to defend the country and render national service when called upon to do so;

**(E)** to promote harmony and the spirit of common brotherhood amongst all the people of India transcending religious, linguistic and regional or sectional diversities; to renounce practices derogatory to the dignity of women;

**(F)** to value and preserve the rich heritage of our composite culture;

**(G)** to protect and improve the natural environment including forests, lakes, rivers and wild life, and to have compassion for living creatures;

**(H)** to develop the scientific temper, humanism and the spirit of inquiry and reform;

**(I)** to safeguard public property and to abjure violence;

**(J)** to strive towards excellence in all spheres of individual and collective activity so that the nation constantly rises to higher levels of endeavour and achievement;

**(K)** to provide opportunities for education by the parent or the guardian, to his child or a ward between the age of 6-14 years as the case may be.

* Constitution of India : Section 51 A

# अनुक्रमणिका


| | | |
|---|---|---|
| 1. | समर्चनम् | 1 |
| 2. | कुलस्य आचारः | 5 |
| 3. | परं निधानम् | 9 |
| 4. | वलभी विद्यास्थानम् | 14 |
| 5. | सुभाषितवैभवः | 18 |
| 6. | सर्वं चारुतरं वसन्ते | 21 |
| 7. | संहतिः कार्यसाधिका | 24 |
| 8. | काषायाणां कोऽपराधः | 29 |
| 9. | उपकारहतस्तु कर्तव्यः | 34 |
| 10. | दौवारिकस्य सेवानिष्ठा | 38 |
| 11. | वेदितव्यानि मित्राणि | 43 |
| 12. | सुभाषित-सप्तकम् | 47 |
| 13. | दिष्ट्या गोग्रहणं स्वन्तम् | 50 |
| 14. | हनुमद्वर्णितरामवृत्तान्तः | 56 |
| 15. | सुदुर्लभा सर्वमनोरमा वाणी | 60 |
| 16. | अजेयः स भविष्यति | 64 |
| 17. | आचार्यः चरकः | 67 |
| 18. | बिलस्य वाणी न कदापि मे श्रुता | 71 |
| 19. | विनोदपद्यानि | 75 |
| 20. | संस्कृतभाषायाः वैशिष्ट्यम् | 79 |
| • | अभ्यास 1 : पुनरावर्तनम् | 84 |
| • | अभ्यास 2 : कारक-विभक्ति परिचयः | 86 |
| • | अभ्यास 3 : क्रियापदानि | 97 |
| • | अभ्यास 4 : कृदन्तपदानि | 107 |
| • | अभ्यास 5 : समास-परिचयः | 110 |
| • | अभ्यास 6 : सन्धिः | 113 |
| • | अभ्यास 7 : अव्ययपदानि | 115 |

# 1. समर्चनम्

[The Vedas are the authentic and authoritative books of ancient Indian society and religion. There are 4 Vedas – Rig Veda, Yajur Veda, Sama Veda and Atharva Veda. The verses of the Vedas are called Mantras. In the Veda Mantras, there is sometimes incantation (hymns of praise) and sometimes prayer. Sometimes there is a description of somebody and sometimes deep philosophical ideas. In the present lesson, only three Mantras of incantation, prayer and worship have been included.

Inspired by the Vedas etc. many hymns and prayers have been composed in different meters which have been preserved in human-mind and reached us. Presented here are three such hymns of praise.

We have the tradition of having an invocation at the beginning of the book. With that in mind, let us begin our learning of Sanskrit with an invocation.]




## वैदिकम्

अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजम् ।
होतारं रत्नधातमम् ॥1॥

- ऋग्वेदः १:१:१

अग्ने व्रतपते व्रतं चरिष्यामि तच्छकेयं तन्मे राध्यताम् ।
इदमहमनृतात् सत्यमुपैमि ॥2॥

- यजुर्वेदः १:५

नमः शम्भवाय च मयोभवाय च नमः शङ्कराय च
मयस्कराय च नमः शिवाय च शिवतराय च ॥3॥

- यजुर्वेदः १६:४१



## लौकिकम्

यं ब्रह्मा वरुणेन्द्र-रुद्र-मरुतः स्तुन्वन्ति दिव्यैः स्तवैः

वेदैः साङ्ग–पद-क्रमोपनिषदैः गायन्ति यं सामगाः ।

ध्यानावस्थिततद्गतेन मनसा पश्यन्ति यं योगिनो

यस्यान्तं न विदुः सुरासुरगणाः देवाय तस्मै नमः ॥4॥

भयानां भयं भीषणं भीषणानां

गतिः प्राणिनां पावनं पावनानाम् ।

महोच्चैःपदानां नियन्तृ त्वमेकं

परेषां परं रक्षकं रक्षकानाम् ॥5॥

वयं त्वां स्मरामो वयं त्वां भजामो

वयं त्वां जगत्साक्षिरूपं नमामः ।

सदेकं निधानं निरालम्बमीशम्

भवाम्भोधिपोतं शरण्यं व्रजामः ॥6॥

## Glossary

**Noun (masc.) : पुरोहितः** Purohita, Familypriest, one who does rituals of a host **यज्ञः** Yagna, sacrificial rite **रत्नधातमः** one who wears gems **व्रतपतिः** Lord of Vows **शम्भवः** who brings tranquility **मयोभवः** from whom happiness is derived **शङ्करः** one, who does welfare **मयस्करः** one who gives happiness **शिवतरः** extremely beneficial **स्तवः** prayer, song of praise **साक्षिरूपः** witness **निरालम्बः** without support, self-dependent.

**Pronoun :** तत् that यम् whom यस्य whose तस्मै for him/to him त्वम् you एकम् one परेषाम् of others वयम् we त्वाम् to you.

**Adjective :** दिव्य divine, भीषण dangerous, dreadful पावन one who purifies नियन्तृ one who governs/controls पर best, excellent निधान treasure

**Adverb :** नमः Salutation ! I bow down

**Compound :** वरुणेन्द्र-रुद्र-मरुतः (वरुणः च इन्द्रः च रुद्रः च मरुतः च इति वरुणेन्द्र....मरुतः, - इतरेतर द्वन्द्वः) सुरासुरगणाः (सुराः च असुराः च इति सुरासुराः, - द्वन्द्वः । सुरासुराणाम् गणाः सुरासुरगणाः - षष्ठी तत्पुरुष ।) (Dissolution (विग्रह) of compounds mentioned in the exercise of the textbook, has been given only to help in teaching.)

**Root (First Gana) :** (Parasmaipada) चर् (**चरति**) to practise गै (**गायति**) to sing दृश् - पश्य् (**पश्यति**) to see स्मृ (**स्मरति**) to remember भज् (**भजति**) to worship नम् (**नमति**) to bow down, to salute व्रज् (**व्रजति**) to go, to attain.

## Notes

**(1) Meaning :** ईळे (ईडे) I pray ऋत्विजम् officiating priest at a sacrifice होतारम् to one who performs sacrificial rite (Havana) शकेयम् I can राध्यताम् make it accomplished उपैमि I approach, I attain स्तुन्वन्ति they pray साङ्ग-पद-क्रमोपनिषदैः six Vedangas, prose in order along with Upanishads गायन्ति they sing सामगाः reciter of Mantras of Samaveda ध्यानावस्थिततद्गतेन having attained state of meditation मनसा by the mind विदुः they know, they attain महोच्चैःपदानाम् of those holding the highest position नियन्तृ one who controls परेषाम् of the best जगत्साक्षिरूपम् epitom of the world एकम् only one of its kind भवाम्भोधिपोतम् the boat which takes one accross the world like ocean शरण्यम् one worthy to take refuge.

**(2) Sandhi :** अग्निमीळे (अग्निमीडे) (अग्निम् ईळे) । तच्छकेयम् (तत् शकेयम्) । तन्मे (तत् मे) । इदमहमनृतात् (इदम् अहम् अनृतात्) । त्वमेकम् (त्वम् एकम्) । भजामो वयम् (भजामः वयम्) । सदेकम् (सत् एकम्) ।

[Vedic language is spoken and written by using accent (सस्वर). There are three kinds of accents. उदात्त, अनुदात्त and स्वरित. While reciting Vedic Mantra उदात्त स्वर is recited in high pitch, अनुदात्त स्वर in low pitch and स्वरित स्वर in medium pitch of tune. While writing the Mantras of Rigveda and Yujurveda, in order to show अनुदात्त स्वर sleeping (horizontal) line (_) is drawn under the particular letter. Similarly to show स्वरित स्वर standing (vertical) line (|) is drawn on the particular letter. No sign is used to show उदात्त स्वर.]

## Exercise

**1. अधोलिखितानां प्रश्नानाम् उत्तराणि लिखत ।**

(1) कम् पुरोहितम् ईडे ?

(2) यज्ञस्य देवः कः अस्ति ?

(3) अहं किं चरिष्यामि ?

(4) दिव्यैः स्तवैः के स्तुवन्ति ?

(5) वयं कं शरणं व्रजामः ?

2. **प्रकोष्ठात् उचितं पदं चित्वा वाक्यपूर्तिं कुरुत ।**

(1) अहं ......... रत्नधातमम् ईळे । (अग्निम्, यज्ञम्, पुरोहितम्)

(2) इदम् अहम् ......... उपैमि । (अनृतात्, सत्यम्, व्रतम्)

(3) योगिनः ......... पश्यन्ति । (ज्ञानेन, चक्षुषा, मनसा)

(4) सुरासुरगणाः देवस्य ......... न विदुः । (स्वरूपम्, निवासम्, अन्तम्)

(5) वयं त्वां जगत्साक्षिरूपं ......... । (भजामः, नमामः, स्मरामः)

3. **प्रकोष्ठगतं पदं प्रयुज्य अधोलिखितानि वाक्यानि प्रश्नार्थस्वरूपे परिवर्तयत ।**

(1) देवाय नमः । (कस्मै)

(2) साङ्ग-पद-क्रमोपनिषदैः वेदैः सामगाः गायन्ति । (के)

(3) योगिनः देवं पश्यन्ति । (कम्)

4. **अधोलिखितानां प्रश्नानाम् मातृभाषायाम् उत्तराणि लिखत ।**

(1) Which special qualities of Agnideva have been described in the Mantra ?

(2) Which Vow has been taken from Agni ?

(3) Whose Darshana do the Yogis have ? How ?

(4) How is the divine quality of the one, in whom the devotees take refuge ?

5. **श्लोकपूर्तिं कुरुत ।**

(1) अग्निमीळे ...... रत्नधातमम् ॥

(2) नमः शंभवाय ..... शिवतराय च ॥

(3) वयं त्वां स्मरामो ..... व्रजामः ॥

6. **क-विभागं ख-विभागेन सह यथार्थरीत्या संयोजयत ।**

| क | ख |
|---|---|
| (1) अग्निम् | (1) नमः |
| (2) शिवाय | (2) पुरोहितम् |
| (3) दिव्यैः | (3) न विदुः |
| (4) अन्तम् | (4) प्राणिनाम् |
| (5) सामगाः | (5) स्तवैः |
| (6) गतिः | (6) गायन्ति |
| | (7) ब्रह्मा |

**Activity**

- Learn by heart these Richas of Veda and Shlokas of prayer.
- Transcribe other Richas and Shlokas and exhibit them in the classroom.
- Recite Mantras and Shlokas in the prayerhall of your school.

●

# 2. कुलस्य आचारः

[Right from ancient time in Sanskrit, the fables literature have been popular in Sanskrit literature. Whether it is a Jataka Tales or Panchatantra or the Hitopadesha, in every book, animals are the characters through which different Tales have been imaginatively written.

Fables are created even today. One such fable is presented here. A bird called the 'Chataka' drinks only rain water. This is a tradition of the Chataka race. Every child born into the Chataka family follows this tradition till doday.

Once, when a child of the Chataka family is so troubled by thirst that not heeding the advice of his mother he gets ready to break this tradition. By chance he hears the conversation between a poor farmer and his son. Inspired by the conversation that he hears between the poor farmer and his son, he goes back to his mother and shows his willingness to follow the customs of his race.

From this story, we will be inspired to follow the age-old traditions and customs in order to make our lives better. Though animals are made the object, ultimately the advice is given for a man. In addition to this, you also have to learn the verb forms and the cases that have been used here.]



एकः चातकशिशुः आसीत् । स एकदा तृषया पीडितः जनन्याः समीपं व्रजति वदति च, ''अम्ब ! तृषा मां पीडयति । अहं जलं पातुम् इच्छामि । सम्प्रति मेघजलं न मिलति, अतः तडागजलमेव पातुम् इच्छामि ।'' जननी वदति, ''बाल ! वयं तु मेघजलम् एव पिबामः, तडागजलं न पिबामः । एषः अस्माकं कुलस्य आचारः । अतः त्वं तडागजलं पातुम् न शक्नोषि'' - इति ।

चातकशिशुः कथयति, ''अम्ब ! महती मे तृषा । अधुना आकाशे मेघान् न पश्यामि । कदा मेघः वर्षिष्यति कदा च अहं मेघजलं पातुं शक्नोमि, इति न जानामि । अतः तृषया पीडितोऽहं तडागजलं पातुं गच्छामि ।''

जननी पुनरपि चातकशिशुं बोधयति, ''बाल ! न अयम् अस्माकं कुलाचारः । कुलाचारः सदैव रक्षितव्यः एव । अतः त्वं तडागजलं पातुं न अर्हसि । तृषायाः सहनं कृत्वा मेघस्य प्रतीक्षां कर्तुम् अर्हसि त्वम् ।''

जनन्याः कथनम् अश्रुत्वा चातकशिशुः तडागजलं पातुं तडागं गन्तुं निर्गच्छति । मार्गे परिश्रान्तः स यदा एकस्य कृषकस्य गृहस्य समीपे तिष्ठति तदा तातपुत्रयोः वार्तालापं शृणोति ।

कृषकः वृद्धः मरणासन्नः च आसीत् । तस्य समीपे स्थितः तस्य पुत्रः तस्मै कृषकाय कथयति, ''तात ! अद्य मार्गे मया धनस्यूतः प्राप्तः । तस्य दर्शनात् आनन्दः जातः । तेन मदीयं दारिद्र्यं नष्टं भविष्यति इति विचार्य धनस्यूतग्रहणाय अहं हस्तं प्रासारयम् । किन्तु तदैव मया भवदीयः उपदेशः स्मृतः - 'अन्यस्य धनस्य ग्रहणम् अस्माकं कुलाचारः न' इति । अतः अहं तं धनस्यूतं तत्रैव अत्यजम् ।''

चातकशिशुः सर्वं शृणोति । सः विचारयति – "अहो ! मरणासन्नस्य वृद्धस्य तत्पुत्रस्य च स्वकीयं कुलाचारं पालयितुं कीदृशी श्रद्धा । अहं तु कुलाचारं न पालयामि । वयं मेघजलमेव पिबामः इति अस्माकं कुलाचारः । तमहं त्यक्तुं प्रवर्ते । एतत् अनुचितमस्ति ।"



सः चिन्तयति –

**पशवः पक्षिणश्चैव मानवाश्च सदाशयाः ।**
**रक्षन्ति स्वकुलाचारं रक्षामि कुलमात्मनः ॥**

एवं विचिन्त्य सः मातरं प्रत्यागच्छति सर्वं वृत्तान्तं च कथयति । माता सन्तोषमनुभवति, शिशवे च आशीर्वादं ददाति । अल्पे एव काले मेघवृष्टिः भवति । मेघजलं पीत्वा चातकशिशोः तृषा शाम्यति ।

## Glossary

**Noun (masc.) : आचारः** behaviour, conduct, (behaviour, conduct followed by tradition) (Ant. अनाचारः) **तडागः** pond **कृषकः** farmer **स्यूतः** bag

**(Fem.) : तृषा** thirst (syn. : पिपासा) **जननी** mother **वृष्टिः** rain (Syn. : वर्षा)

**(Neu.) : शतम्** hundred **पानम्** a drink (act to drinking)

**Pronoun : माम्** to me **मे** to me **मया** by me **तेन** by him (masc.) **त्वया** by you **तस्यै** to her (fem.)

**Adjective : महती** very much (fem.) **परिश्रान्त** one who is tired

**Adverb : सम्प्रति** at present, now **अतः** hence, therefore **एव** only **इति** thus, in this way **अधुना** now **कदा** when **अद्य** today **सम्यक्** in a good manner **ततः** then

**Compound :** चातकशिशुः (चातकस्य शिशुः, षष्ठी तत्पुरुष) । मेघजलम् (मेघस्य जलम् । षष्ठी तत्पुरुष) । तडागजलम् (तडागस्य जलम्, षष्ठी तत्पुरुष) । कुलाचारः (कुलस्य आचारः । षष्ठी तत्पुरुष) । तातपुत्रयोः (तातः च पुत्रः च – तातपुत्रौ । तयोः । इतरेतर द्वन्द्व) मरणासन्नः (मरणम् आसन्नः । द्वितीया तत्पुरुष) । धनस्यूतः (धनस्य स्यूतः । षष्ठी ततुपुरुष) । धनस्यूतग्रहणाय (धनस्यूतस्य ग्रहणम् – धनस्यूतग्रहणम्, तस्मै । षष्ठी तत्पुरुष) । तत्पुत्रस्य (तस्य पुत्रः – तत्पुत्रः, तस्य । षष्ठी तत्पुरुष) । अनुचितम् (न उचितम् – अनुचितम्, नञ्तत्पुरुष) । मेघवृष्टिः (मेघस्य वृष्टिः । षष्ठी तत्पुरुषः) ।

**Participle :** गत्वा (गम् + त्वा) । पातुम् (पा + तुम्) । कृत्वा (कृ + त्वा) । कर्तुम् (कृ + तुम्) । अश्रुत्वा (न > अ + श्रु + त्वा) । गन्तुम् (गम् + तुम्) । विचार्य (वि + चर् > चारि (प्रेरक) + त्वा > य) । श्रुत्वा (श्रु + त्वा) । रक्षितुम् (रक्ष् + तुम्) । त्यक्तुम् (त्यज् + तुम्) । विचिन्त्य (वि + चिन्त् + त्वा > य) । पीत्वा (पा + त्वा) । (This method of explanation given here is to help teaching.)

**Root : (First Gana)** (Parasmaipada) **वद्** (**वदति**) to sepak, to say **इष् > इच्छ्** (**इच्छति**) to wish, to desire **मिल्** (**मिलति**) to meet **पा > पिब्** (**पिबति**) to drink **अर्ह्** (**अर्हति**) to deserve, to be capable of **निर् + गम् > गच्छ्** (**निर्गच्छति**) to exit **स्था > तिष्ठ्** (**तिष्ठति**) to stand, to stay **भू** (**भवति**) to be **त्यज्** (**त्यजति**) to leave, to abandon **आ + चर्** (**आचरति**) to behave, to practise **मृ** (**मरिष्यति, लृट्लकार-भविष्यकाल**) to die **वृष्** (**वर्षति**) to rain **रक्ष्** (**रक्षति**) to protect, to preserve **प्रति + आ + गम् > गच्छ्** (**प्रत्यागच्छति**) to go back, to return **अनु + भू** (**अनुभवति**) to experience

**Atmanepada : प्र + वृत्** (**प्रवर्तते**) to get ready, to get engaged

**Fourth Gana शम्** (**शाम्यति**) to become quiet

**Tenth Gana : पीड्** (**पीडयति**) to give suffering, torment **कथ्** (**कथयति**) to tell **पाल्** (**पालयति**) to observe **चिन्त्** (**चिन्तयति**) to think.

## Notes

**Meanings : पातुम् न शक्नोषि** you cannot drink **अम्ब** O mother **वर्षिष्यति** will rain **रक्षितव्यः** should be protected **सहनं कृत्वा** having suffered **परिश्रान्तः** tired **तातपुत्रयोः** of father and son **मरणासन्नः** one whose death is imminent lying on the death bed **धनस्यूतः** bag of wealth (money) **दारिद्र्यम्** poverty **हस्तम् प्रासारयम्** I stretched my hand **त्यक्तुं प्रवर्ते** I have become ready to give up **अनुचितमस्ति** is not fair **भवादृशाः** like you **कुलमात्मनः** to one's own family (lineage) **ददाति** gives **अल्पे एव काले** within no time **तृषा शाम्यति** thirst is quenched

**Sandhi :** पीडितोऽहम् (पीडितः अहम्) । पुनरपि (पुनः अपि) ।

## Exercises

**1. विकल्पेभ्यः समुचितं पदम् चित्वा लिखत ।**

(1) तृषापीडितः शिशुः कस्य समीपं गच्छति ? ◯

(क) जनन्याः (ख) जलस्य (ग) नीडस्य (घ) गगनस्य

(2) 'मेघ' शब्दस्य पर्यायः कः ? ◯

(क) जलम् (ख) वृष्टिः (ग) जलदः (घ) गगनम्

(3) सर्वैः किं रक्षितव्यम् ? ◯

(क) तडागः (ख) कुलाचारः (ग) मेघः (घ) शिशुः

(4) वृद्धः कीदृशः आसीत् ? ◯

(क) अन्धः (ख) विकलः (ग) मरणासन्नः (घ) स्वस्थः

(5) शिशुः कस्य प्रतीक्षां करोति ? ◯

(क) मेघस्य (ख) मेघाय (ग) मेघम् (घ) मेघेन

(6) 'पुनरपि' शब्दस्य उचितं सन्धिविच्छेदं दर्शयत ! ◯

(क) पुन + रपि (ख) पुनो + अपि (ग) पुनः + अपि (घ) पुनर् + पि

(7) 'वत्स ! कुलस्य आचारं रक्षितुं त्वया सम्यक् आचरितम् ।' एतत् वाक्यं कः वदति ? ◯

(क) जननी (ख) वृद्धः (ग) कृषकपुत्रः (घ) चातकः

(8) अहं तडागजलं पातुम् ........ । ◯

(क) इच्छति (ख) इच्छसि (ग) इच्छामि (घ) इच्छतु

**2. संस्कृतभाषया उत्तरं लिखत ।**

(1) कः तृषया पीडितः आसीत् ?

(2) चातकशिशुः किं पातुं न अर्हति ?

(3) कृषकपुत्रस्य दारिद्र्यं केन नष्टं भविष्यति ?

(4) कृषकपुत्रेण मार्गे किं प्राप्तम् ?

(5) शिशोः तृषा केन नष्टा ?

**3. रेखाङ्कितपदानां स्थाने कोष्ठकात् पदं प्रस्थाप्य प्रश्नवाक्यं रचयत ।**

(कः, का, कुत्र, कीदृशः, किम्, कस्यै)

(1) जननी शिशुं बोधयति ।

(2) मार्गे परिश्रान्तः सः तिष्ठति ।

(3) कृषकः वृद्धः आसीत् ।

(4) धनस्यूतः मार्गे प्राप्तः ।

(5) सः तस्यै सर्वं वृत्तान्तं कथयति ।

**4. निर्देशानुसारं धातुरूपाणां परिचयं लिखत ।**

| | धातुरूपम् | धातुः | कालः/लकारः | पदम् | पुरुषः | वचनम् |
|---|---|---|---|---|---|---|
| (1) | इच्छामि | .......... | .......... | .......... | .......... | .......... |
| (2) | गच्छति | .......... | .......... | .......... | .......... | .......... |
| (3) | अर्हसि | .......... | .......... | .......... | .......... | .......... |
| (4) | कथयति | .......... | .......... | .......... | .......... | .......... |
| (5) | वदति | .......... | .......... | .......... | .......... | .......... |

**5. मातृभाषायाम् उत्तराणि लिखत ।**

(1) What does Kulachara mean ?

(2) What does mother ask baby Chataka not to do ?

(3) In spite of being poor, why did farmer's son even not touch the bag of wealth ?

(4) Why did baby Chataka not drink water from the pond ?

**Activity**

- Make a list of code of conduct followed in your school.
- Make list of traditions practised in your family.
- Under the little thirsty baby-Chataka, write this story in your mother tongue. (English)
- Convey best wishes to younger ones on their birthday by blessing them with the words शतं जीव शरदः ।

•

# 3. परं निधानम् कः

[Raja Bhoja lived in the 11th century A.D. in Malwa. (known as Madhya Pradesh at present.) Living in Dharanagar, the fame that Raja Bhoja attained at that time is still alive today. Even today many interesting stories of his good governance, his ability to be just even under the most difficult circumstances and his ability to recognize the learned are popular. A collection of such stories in Sanskrit called 'Bhojaprabandha' is very well-known. In this there are many events related to Raja Bhoja are described here by using many verses with aesthetic poetic qualities.

In addition to this, Sanskrit poets of different periods have accepted Raja Bhoja as a character to present their ideas. One such story in dialogue form is presented here focusing on Bhoja. In this dialogue between Raja Bhoja and young scholar it has been attempted to emphasise strength of one thing over the other. As the conversation progresses, there is a total halt when it comes to the point of contentment. That is, this story lays stress on the importance of contentment.

While reading this lesson, it is important to pay attention to the concord between the case of the doer and the verb forms. In addition to this, you also have to learn how the case endings of nouns and the various forms of the verb change.]

---

भोजः नाम नृपतिः विद्याप्रियः, कलाप्रियः, प्रजाप्रियश्च आसीत् । अतः तस्य राजसभायां दूरदेशात् अनेके विद्याविशारदाः पण्डिताः समागच्छन्ति स्म ।

एकदा भोजः प्रासादस्य गवाक्षे उपविष्टः आसीत् । सः मार्गे एकं नवागन्तुकम् अनभिज्ञं युवकं पश्यति । तस्य परिचयं ज्ञातुं सः तं प्रासादे आह्वयति । ततस्तयोः मध्ये एवं वार्तालापः संजातः ।



भोजः : भवान् कः वर्तते ?

युवकः : अहं घटपण्डितः अस्मि ।

भोजः : घटपण्डितः ? किं नाम घटपण्डितः इति ?

युवकः : यथा घटे परिपूर्णं जलं तिष्ठति, तथैव मयि परिपूर्णं ज्ञानं वर्तते । अतः अहं स्वात्मानं घटपण्डितं मन्ये ।

भोजः : (युवकस्य गर्वपूर्णाम् उक्तिं श्रुत्वा स्वात्मानं ततोऽप्यधिकं मत्वा अहङ्कारेण सह) यदि त्वं घटः असि, तर्हि अहं मुद्गरत्वेन वर्ते । मुद्गरः स्वकीयेन प्रहारेण घटं विनाशयति । अहमपि घटरूपं भवन्तं विनाशयामि ।

युवकः : यदि भवान् मुद्गरत्वेन वर्तिष्यते, तर्हि अहम् अग्निः भवामि । दहनकर्मा अग्निः भूत्वा मुद्गरं भस्म करिष्यामि ।

भोजः : त्वं यदि वह्नित्वेन वर्तिष्यसे, तर्हि अहं वृष्टिः भविष्यामि । वृष्टेः पुरतः वह्निः स्थातुं न शक्नोति, तथा त्वमपि मम पुरतः स्थातुं न शक्नोषि ।

युवकः : वृष्टिं तु वायुः स्वबलेन यत्र कुत्रापि वाहयितुमर्हति । वृष्टिरूपं भवन्तमहं वायुः भूत्वा इतः ततः वहिष्यामि ।



भोजः : यदि भवान् वातत्वेन वर्तिष्यते, तर्हि अहं वायुभक्षकः भुजगः भविष्यामि । भुजगः सन् सततं वायुरूपं भवन्तं भक्षयिष्यामि ।

युवकः : भवान् यदि सर्पः भविष्यति, तर्हि अहं सर्पभक्षको गरुडो भवामि ।

भोजः : (वाक्केलीं वर्धयन्) त्वं यदि गरुडः असि, तर्हि अहं चक्रधारकः विष्णुः । विष्णुः गरुडारूढः भवति ।

युवकः : (मनसा विष्णुं प्रणम्य च पाण्डित्यं प्रदर्शयन् अग्रे वदति ।) यदि भवान् चक्रधरः विष्णुः, तर्हि अहं भवतः मस्तकस्य उपरि शोभमानं मुकुटं अस्मि । मुकुटं सदा मस्तकस्य उपरि एव संतिष्ठते ।

भोजः : (युवकस्य पाण्डित्यम् अनुभूय) तर्हि मुकुटस्य उपरि शोभमानं पुष्पमहम् । एवमहं अधुना तवोपरि स्थास्यामि ।

युवकः : भवान् यदि पुष्पं भविष्यति, तर्हि अहमपि भ्रमरो भूत्वा तव पुष्पस्योपरि स्थास्यामि ।

भोजः : एवं भवान् द्विरेफः तर्हि अहं सूर्यः । पुष्पस्य अन्तः स्थितः भ्रमरः सूर्यास्तकाले बन्दी भवति, अहमपि त्वं बन्दिनं करिष्यामि ।

युवकः : अहो ! भवान् सूर्यस्तर्हि अहं महाप्रभावी राहुः । राहुस्तु सूर्यं ग्रसते ।

भोजः : (किञ्चित् उच्चैः) भवान् राहुश्चेत् अहं राहुरूपाय तुभ्यं दानं दास्यामि । दानग्रहणेन तवायं गर्वः निश्चयेन शान्तः भविष्यति ।

युवकः : (विहस्य चातुर्येण) यदि भवान् दानी तर्हि अहं सन्तुष्टः । भवतः दानस्य प्रयासः निष्फलः भविष्यति । सर्वतः अलुब्धः अहं भवतः दानं न ग्रहीष्यामि ।

एवमुत्तरोत्तरं विवादरतयोः भोजयुवकयोः मध्ये यदा सन्तोषस्य विषयः समुपस्थितः तदा 'समागते संतोषे सर्वं शान्तं भवति' इति वचनानुसारं विवादोऽपि स्वयमेव शान्तः ।

अन्ते चतुरं ज्ञानेन गुणेन च उपेतं तं पण्डितं युवकं प्रणम्य धाराधिपतिः भोजराजः अवदत् ''अयि घटपण्डित ! गुणपूजके धारादेशे भवतः स्वागतमस्ति । भवान् विजयी जातः । सन्तुष्टं जनं न कोऽपि पराजेतुमर्हति । यतो हि सन्तोष एव पुरुषस्य परं निधानं वर्तते ।''

## Glossary

**Noun (masc.)** **नृपतिः** king **प्रासादः** palace **गवाक्षः** balcony **मुद्गरः** hammer (a tool like wooden bat, heavy in weight) (an implement for exercise) **वह्निः** fire **वायुभक्षकः** one who eats air, **वातः** wind **भुजगः** snake **द्विरेफः** bee, wasp

**(Fem.) :** **वृष्टिः** rain **वाक्केली** play of words

**(Neu.) :** **निधानम्** treasure

**Pronoun :** **तस्य** his (masc.) **सः** he (masc.) **अनेके** many **तम्** to him (masc.) **तयोः** of both of them (masc.) **भवान्** you **मयि** in me **मम** my **भवन्तम्** to you **तव** your **तुभ्यम्** for you, to you **भवतः** your

**Adjective :** **विशारद** clever, skillful **कोविद** experienced, a learned **धुरंधर** one who hold a yoke, leader, chief **अनभिज्ञ** stranger, unknown **शोभमान** adorning

**Adverb :** **एकदा** once **उपरि** on the upper side **अतः** hence **ततः** therefore **यदि** if **तर्हि** then **पुरतः** in front of **यत्र** where **कुत्रापि** anywhere **इतः** from here **ततः** from there **सदा** always **अधुना** now **मध्ये** in between **अयि** word used to address, O ! **यतो हि** because

**Compound :** राजसभायाम् (राज्ञः सभा – राजसभा, तस्याम् । षष्ठी तत्पुरुष) । विद्याविशारदः (विद्यासु विशारदः – विद्याविशारदः । सप्तमी तत्पुरुष) । वार्तालापः (वार्तायाः आलापः । षष्ठी तत्पुरुष) भोजयुवपण्डितयोः (भोजः च युवपण्डितः च – भोजयुवपण्डितौ, तयोः । इतरेतर द्वन्द्व) । गर्वपूर्णाम् (गर्वेण पूर्णा – गर्वपूर्णा, ताम् । तृतीया तत्पुरुष) वायुभक्षकः (वायोः भक्षकः । षष्ठी तत्पुरुष) गरुडारूढः (गरुडम् आरूढः । द्वितीया तत्पुरुष) सूर्यास्तकाले (सूर्यस्य अस्तकालः – सूर्यास्तकालः, तस्मिन् । षष्ठी तत्पुरुष) दानग्रहणेन (दानस्य ग्रहणम् – दानग्रहणम्, तेन । षष्ठी तत्पुरुष) भोजयुवकयोः (भोजः च युवकः च भोजयुवकौ, तयोः । इतरेतर द्वन्द्वः) । धाराधिपतिः । (धारायाः अधिपतिः । षष्ठी तत्पुरुष)

**Root : (First Gana)** (Parasmaipada) **सम् + आ + गम् > गच्छ्** (**समागच्छति**) to come **आ + ह्वे > ह्वय्** (**आह्वयति**) to call **अर्ह्** (**अर्हति**) to deserve **वह्** (**वहति**) to carry (Atmanepada) **सम् + स्था – तिष्ठ्** (**संतिष्ठते**) to stand / stay **वृत्** (**वर्तते**) to be **ग्रस्** (**ग्रसते**) to swallow

## Notes

**(1) Meaning :** **विद्याविशारदाः** expert in many lores **उपविष्टः** one who is seated **नवागन्तुकम्** to a newly arrived **निम्नानुसारम्** as given below **घटपण्डितः** scholar who is filled with wisdom **परिपूर्णम्** filled to the brim **गर्वपूर्णाम् उक्तिम्** words filled with arrogance **मुद्गरत्वेन** like a hammer **प्रहारेण** by a stroke **वर्तिष्यते** will behave **दहनकर्मा** one who burns **वाहयितुमर्हति** capable of blowing away **वृष्टिरूपम्** who is like rain **इतः ततः** here and there **वहिष्यामि** I will carry away **पाण्डित्यं प्रदर्शयन्** showing scholarship **शोभमानम्** to one who adorns **अनुभूय** having experienced / experiencing **स्थास्यामि** I shall stand / stay **ग्रहीष्यामि** I shall receive **बन्दी** prisoner **महाप्रभावी** one who is lustrous **निश्चयेन** certainly **विहस्य** laughing **चातुर्येण** cleverly **अलुब्धः** one who is free from greed **एवमुत्तरोत्तरम्** thus gradually **विवादरतयोः** of those engrossed in controversy **वचनानुसारम्** as per words **अन्ते** at last **उपेतम्** associated **गुणपूजके** one who worships virtues **धारादेशे** in Dharadesha **विजयी जातः** became victorious / has conquered **पराजेतुमर्हति** can be defeated

**(2) Sandhi :** प्रजाप्रियश्च (प्रजाप्रियः च) । ततस्तयोः (ततः तयोः) । तथैव (तथा एव) । ततोऽप्यधिकम् (ततः अपि अधिकम्) । कुत्रापि (कुत्र अपि) । तवोपरि (तव उपरि) । भ्रमरो भूत्वा (भ्रमरः भूत्वा) । सूर्यस्तर्हि (सूर्यः तर्हि) ।

## Exercies

**1. अधोलिखितेभ्यः विकल्पेभ्यः समुचितम् उत्तरं चिनुत ।**

(1) अहं घटपण्डितः ............... । ◯

(क) स्मः (ख) अस्मि (ग) अस्ति (घ) सन्ति

(2) 'वायुः' इति शब्दस्य पर्यायशब्दः कः ? ◯

(क) वाक् (ख) वा (ग) वातः (घ) वह्निः

(3) 'गवाक्षः' शब्दस्य अर्थः कः ? ◯

(क) Peak (ख) Terrace (ग) Court (घ) Balcony

(4) भूपालः मार्गे सुवर्णखण्डम् ............... । ◯

(क) अक्षिपन् (ख) अक्षिपसः (ग) अक्षिपत् (घ) अक्षिपम्

(5) संसारे कीदृशं जनं पराजेतुं कोऽपि न अर्हति ? ◯

(क) धनिकम् (ख) सन्तुष्टम् (ग) वाचालम् (घ) बलिष्ठम्

(6) अहं दानं ............... । ◯

(क) करिष्यति (ख) करिष्यामि (ग) करिष्यसि (घ) करिष्यन्ति

(7) कस्य शिखरे मुकुटं सदा तिष्ठति ? ◯

(क) मस्तके (ख) मस्तकस्य (ग) मस्तकं (घ) मस्तकात्

**2. संस्कृत भाषया उत्तरं लिखत ।**

(1) अग्निः कं भस्म करोति ?

(2) राहुः केन शान्तः भवति ?

(3) सन्तोष एव कस्य परं निधानम् ?

(4) भ्रमरः कुत्र बन्दी भवति ।

**3. उदाहरणानुसारं शब्दरूपाणां परिचयं लिखत ।**

| | शब्दरूपम् | मूलशब्दः | अन्तः | लिङ्गम् | विभक्तिः | वचनम् |
|---|---|---|---|---|---|---|
| उदाहरणम् – | जनाः | जन | अकारान्तः | पुल्लिंगम् | प्रथमा | बहुवचनम् |
| (1) | प्रासादस्य | .......... | .......... | .......... | .......... | .......... |
| (2) | गवाक्षे | .......... | .......... | .......... | .......... | .......... |

(3) वृष्टेः .......... .......... .......... .......... ..........

(4) पण्डितम् .......... .......... .......... .......... ..........

(5) विवादरतयोः .......... .......... .......... .......... ..........

**4. वचनानुसारं धातुरूपैः रिक्तस्थानानि पूरयत ।**

| | | |
|---|---|---|
| **उदा. वर्तते** | **वर्तेते** | **वर्तन्ते ।** |
| (1) .......... | तिष्ठतः | .......... । |
| (2) अर्हति | .......... | .......... । |
| (3) ग्रहीष्यामि | .......... | .......... । |
| (4) .......... | भविष्यतः | .......... । |

**5. शीर्षकानुरूपं धातुरूपाणां परिचयं लिखत ।**

| | धातुरूपम् | धातुः | कालः/लकारः | पदम् | पुरुषः | वचनम् |
|---|---|---|---|---|---|---|
| उदा. | सेवन्ते | सेव् | वर्तमान | आत्मनेपद | अन्य | बहुवचनम् |
| (1) | अपश्यत् | .......... | .......... | .......... | .......... | .......... |
| (2) | तिष्ठति | .......... | .......... | .......... | .......... | .......... |
| (3) | भविष्यति | .......... | .......... | .......... | .......... | .......... |
| (4) | स्थास्यामि | .......... | .......... | .......... | .......... | .......... |

**6. कोष्ठकेषु प्रदत्तानि पदानि प्रयुज्य संस्कृतवाक्यानि रचयत ।**

(1) The king sees a youth. (नृप, युवक, दृश्-पश्य्)

(2) People go to the assembly. (जन, सभा, गम्-गच्छ्)

(3) Virtues are worshipped in Dharadesha. (धारादेश, गुण, पूजा, भू)

(4) Bhoja was favourite among his people. (भोज, प्रजा, प्रिय, भू)

(5) Agni (fire) burns the hammer. (वह्नि, मुद्गर, दह्)

**7. मातृभाषायाम् उत्तरत ।**

(1) How was king Bhoja ?

(2) Why does the youth believe himself to be Ghatapandita ?

(3) When does the discussion between king Bhoja and the youth stop ? Why ?

(4) What was the speciality of Dharadesha ?

**Activity**

- Write in brief the theme of the prose **परं निधानम्**..
- Present one of the stories from 'Bhojaprabandha' in the class.

# 4. वलभी विद्यास्थानम्

[In ancient India education was widespread and prevalent. In ancient Greater India, there were great centres of learning in many big cities where scholars from different parts of the world studied. One such centre of learning was in Gujarat.

In this lesson, an introduction is given of that centre. Mainly, this lesson has been written in such a way that gives an idea of the teaching-learning method of such centres.

As the content of this lesson deals with the past, an attempt has been made to teach the uses of the past tense too in the sentences here. The language of this lesson is simple and you can also learn the forms of nouns as well as the formation of compound words, along with verb forms.]

सम्प्रति विविधाः विश्वविद्यालयाः सुप्रसिद्धाः सन्ति । तेषु केचन एतादृशाः सन्ति यत्र अध्ययनार्थं प्रवेशं प्राप्य छात्रः स्वात्मानं धन्यं मन्यते । एवमेव पुराकालेऽपि अस्माकं भारते देशे एतादृशाः बहवः विश्वविद्यालयाः आसन् । तत्र विद्याध्ययनाय दूरात् देशात् समागत्य प्रवेशं लब्ध्वा छात्राः स्वात्मानं धन्यं मन्यन्ते स्म । एषु एकतमः वलभी विश्वविद्यालयः । मगधराज्ये यथा नालंदा आसीत् तथैव अत्र गुर्जरप्रदेशे वलभी आसीत् । अत्रापि सुदूरात् देशात् जनाः अध्ययनाय आगच्छन्ति स्म । अद्यत्वे अस्मदीये गुर्जरप्रदेशे वर्तमाने भावनगरे जनपदे वलभीनामकं यदेकम् उपनगरं वर्तते, तत्रैव प्राचीनकाले वलभी विश्वविद्यालयः आसीत् ।



वस्तुतस्तु इदम् उपनगरं प्राचीनकालादेव अध्ययन-अध्यापनस्य केन्द्रमासीत् । पूर्वमत्र अष्टादशविद्यायाः पठनं पाठनं च भवति स्म । एतासु विद्यासु चत्वारो वेदाः, षट् वेदाङ्गानि, पुराणम्, न्यायः, मीमांसा, स्मृतिः, आयुर्वेद-धनुर्वेद-गन्धर्ववेद-अर्थवेदाः चत्वारः उपवेदाः च समाविष्टाः सन्ति । ततः बौद्धदर्शनस्य जैनदर्शनस्य च इदं केन्द्रं सञ्जातम् । ख्रिस्तस्य चतुर्थ्यां शताब्द्याम् ऋग्वेदस्य भाष्यकारः स्कन्दस्वामी सञ्जातः । सः अत्रैव अवसत् । एतत् सूचयति यत् गुप्तकाले अत्र वेदाध्ययनमपि प्रचलति स्म । ख्रिस्तस्य चतुर्थ्यां शताब्द्यामेव सुप्रसिद्धौ बौद्धाचार्यौ स्थिरमतिगुणमती, जैनाचार्यः श्रीमल्लवादी सूरिः च अत्रैव विद्याव्यासंगं कुर्वन्ति स्म ।

एतत् सूचयति यदत्र जैन-बौद्धदर्शनानामपि अध्ययनं प्रचलति स्म । अत्र यथारुचि यथामति छात्रा: अपठन् । प्रवेशार्थमत्र प्रवेशपरीक्षापि भवति स्म । तामुत्तीर्य एव अत्र छात्रस्य प्रवेश: शक्य: आसीत् ।

खिस्तस्य पञ्चम्यां शताब्द्याम् इदमुपनगरं मैत्रकाणां राजधानी आसीत् । मैत्रकाणां व्यवस्थानुसारम् अध्ययनस्य समाप्त्यनन्तरं वादसभायां शास्त्रार्थ: भवति स्म । शास्त्रार्थे विभिन्नानां मत-मतान्तराणां खण्डन-मण्डनपूर्वकं विमर्श: भवति स्म । अनेकस्मै विजयिजनाय राजा पारितोषिकरूपेण भूमिम् अयच्छत् । कदाचित् विजयिजनानां नामानि विद्यापीठस्य द्वारे उट्टंकितानि अभवन् ।

खिस्तात् पूर्वं प्राय: पञ्चमशताब्द्यां भगवत: महावीरस्य जन्म अभवत् । तस्मिन् काले भगवता महावीरेण य: उपदेश: प्रदत्त: स आगम–नाम्ना प्रसिद्ध: वर्तते । अयम् आगम: वर्षपञ्चशतं यावत् मौखिकपरम्परायां सुरक्षित: आसीत् । एवं हि श्रूयते यत् खिस्तस्य तृतीयायां शताब्द्यां नागार्जुननाम्ना प्रसिद्धस्य विदुष: अध्यक्षतायाम् एका जैनसाधूनां समिति: मिलिता । अस्याम् आगमग्रन्थानां लेखनस्य प्रस्तावोऽभवत् । अत्र लेखबद्धा वाणी वलभीवाचना नाम्ना प्रसिद्धा जाता ।

खिस्तस्य नवम्यां शताब्द्यां वलभीनगरस्य विनाश: अभवत् । परन्तु तस्य अवशेषा: अद्यापि तस्य समृद्धिं सूचयन्ति । एवं भारतस्य प्राचीनेषु विद्याकेन्द्रेषु वलभी एकतमम् आसीत्, इतिहासे च अद्यापि वर्तते ।

## Glossary

**Noun (masc.) : भाष्यकार:** commentator **विजयिजन:** one who is victorious **आगम:** Agama (religious book of Jainism) **अवशेष:** remains

**(Fem.) : शताब्दी** century

**(Neu.) : जनपदम्** city (district) **उपनगरम्** suburb

**Adjective : एतादृश** of this kind, such **धन्य** fortunate, blessed **अस्मदीय** our

**Adverb : सम्प्रति** at present, now **पुरा** formerly **यथा-तथा** just as, so as **पूर्वम्** before **अनन्तरम्** afterwards **यावत्** as long as

**Compound :** समाप्त्यनन्तरम् (समाप्ते: अनन्तरम् । पंचमी तत्पुरुष)

**Root : (Fourth Gana)** (Atmanepada) **मन् ( मन्यते )** to believe

**(Tenth Gana)** (Parasmaipada) **सूच् ( सूचयति )** to indicate, to inform

## Notes

**Meaning : केचन** some **स्वात्मानम्** to oneself **समागत्य** having come, having arrived **लब्ध्वा** obtaining **एकतम:** one among many **अष्टादश** eighteen **समाविष्टा:** included **विद्याव्यासंगम्** study **यथारुचि** as per interest **यथामति** as per intellect **उत्तीर्य** having passed **मैत्रकाणाम्** of Maitraka kings **मतमतान्तराणाम्** of different ideas **खण्डनमण्डनपूर्वकम्** with refutation and support (khandan means to refute opponent's view and mandan means to support and to establish one's own point. **विमर्श:** thought **उट्टङ्कितानि** engraved **प्रदत्त:** gave **विदुषाम्** of the learneds (scholars) **मिलिता** met **जाता** became.

## Exercises

**1. अधोलिखितेभ्यः विकल्पेभ्यः समुचितम् उत्तरं चिनुत ।**

(1) प्राचीनसमये गुर्जरराज्ये कः विश्वविद्यालयः आसीत् ? ◯

(क) नालन्दाविश्वविद्यालयः (ख) तक्षशिलाविश्वविद्यालयः

(ग) गुजरातविश्वविद्यालयः (घ) वलभीविश्वविद्यालयः

(2) उपवेदाः कति सन्ति ? ◯

(क) अष्टादश (ख) चत्वारः (ग) सप्त (घ) पञ्च

(3) भाष्यकारः स्कन्दस्वामी कस्यां शताब्द्यां सञ्जातः ? ◯

(क) नवम्याम् (ख) चतुर्थ्याम् (ग) सप्तम्याम् (घ) पञ्चम्याम्

(4) वलभी केषां राजधानी आसीत् ? ◯

(क) क्षत्रपाणाम् (ख) मैत्रकाणाम् (ग) द्राविडानाम् (घ) गुप्तानाम्

(5) महावीरस्य उपदेशः केन नाम्ना प्रसिद्धः वर्तते ? ◯

(क) आगम (ख) निगम (ग) स्मृति (घ) मीमांसा

(6) वलभीनगरे मिलितायाः जैनसाधूनां समितेः अध्यक्षः कः आसीत् ? ◯

(क) नागार्जुनः (ख) स्थिरमतिः (ग) मैत्रकः (घ) गुणमतिः

**2. एकवाक्येन संस्कृतभाषायाम् उत्तराणि प्रदत्त ।**

(1) प्राचीनकालात् वलभी कस्य केन्द्रमासीत् ?

(2) वेदाङ्गानि कति सन्ति ?

(3) श्रीमल्लवादी सूरिः कः आसीत् ?

(4) भगवतः महावीरस्य जन्म कदा अभवत् ?

(5) जैनसाधूनां समितौ कस्य लेखनस्य प्रस्तावः अभवत् ?

**3. रेखाङ्कितपदानां स्थाने प्रकोष्ठात् उचितं पदं चित्वा प्रश्नवाक्यं रचयत ।**

(कुत्र, केन, कः, कदा, केषाम्, कस्य)

(1) ऋग्वेदस्य भाष्यकारः <u>स्कन्दस्वामी</u> आसीत् ।

(2) <u>महावीरस्य</u> उपदेशः आगमनाम्ना प्रसिद्धः वर्तते ।

(3) <u>जैनसाधूनां</u> समितिः मिलिता ।

(4) <u>नवम्यां शताब्द्यां</u> वलभीनगरस्य विनाशः अभवत् ।

(5) लेखबद्धः उपदेशः <u>वलभीवाचना</u> नाम्ना प्रसिद्धः जातः ।

**4. वचनानुसारं शब्दरूपैः रिक्तस्थानानि पूरयत ।**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| (1) | आगमम् | .......... | .......... |
| (2) | जनपदे | .......... | .......... |
| (3) | .......... | .......... | केन्द्रेषु |

**5. 'स्म'-प्रयोगं कुरुत ।**

(1) छात्राः यथारुचि अपठन् ।

(2) स्कन्दस्वामी अत्रैव अवसत् ।

(3) राजा भूमिम् अयच्छत् ।

**6. रेखाङ्कितानां पदानां समासप्रकारं लिखत ।**

(1) वादसभायां शास्त्रार्थं भवति स्म ।

(2) स्थिरमतिगुणमती बौद्धाचार्यौ आस्ताम् ।

(3) अत्र प्रवेशपरीक्षा भवति स्म ।

**7. प्रदत्तानि पदानि प्रयुज्य संस्कृतवाक्यानि रचयत ।**

(1) Valabhi was the capital of Maitrakas.

वलभी मैत्रक राजधानी अस्

(2) People used to come from distant countries.

सुदूर देश जन अध्ययन आ + गम्

(3) Nagarjuna was a reputed (well-known) scholar.

नागार्जुन प्रसिद्ध पंडित अस्

(4) There are four Vedas. (Vedas are four)

वेद चतुर् अस्

(5) Valabhi was destroyed.

वलभी विनाश भू (भव्)

**8. मातृभाषया उत्तराणि लिखत ।**

(1) Which eighteen lores were taught and learnt in Valabhi ?

(2) How many Vedas and Upvedas are there ?

(3) What type of arrangement was there for study during Maitraka rule ?

(4) Which preceptors (Acharyas) were there in Valabhi ?

**Activity**

- Visit a University.
- Collect information and pictures of other ancient Universities.
- Get the volumes like Rigveda, Yajurveda with the help of a teacher and look at them.
- Prepare a chart of sentences with स्म and without स्म.
- Collect information about the founders of Jainism and Buddhism.

●

# 5. सुभाषितवैभवः

[In Sanskrit literature, the longest poetic work is known as 'Mahakavya', and the smallest poetic work is known as 'Muktaka'. Just as a single pearl is invaluable, so too are these small 'Muktakas'. These 'Muktakas' are sayings or epigrams. This well-known and melodious form of Sanskrit literature has the distinctive ability to serve in its four lines the precious teachings of life in the most aesthetic manner. From these epigrams we get the moral of ideal life and goodness. Such epigrams have been collected in this lesson.

In the epigrams chosen for this lesson, you will notice words with a one type of case-endings. These case-endings will help you in learning the Sanskrit language. On the other hand, these epigrams will also provide you with inspiration to develop the values in them, the immortality of fame in this mortal world, greed as the basic cause of all sins, the ability to recognize friends and one's kin, the characteristics of good and bad people etc. These will help you to make your life bright and virtuous.]

माधुर्यमक्षरव्यक्तिः पदच्छेदस्तु सुस्वरः ।
धैर्यं लयसमर्थं च षडेते पाठका गुणाः ॥1॥

चलं वित्तं चलं चित्तं चले जीवितयौवने ।
चलाचलमिदं सर्वं कीर्तिरिव हि जीवति ॥2॥



मक्षिकाः व्रणमिच्छन्ति धनमिच्छन्ति पार्थिवाः ।
नीचाः कलहमिच्छन्ति शान्तिमिच्छन्ति साधवः ॥3॥

गावो गन्धेन पश्यन्ति वेदैः पश्यन्ति ब्राह्मणाः ।
चारैः पश्यन्ति राजानश्चक्षुर्भ्यामितरे जनाः ॥4॥

दरिद्राय धनं देयं ज्ञानं देयं जडाय च ।
पिपासिताय पानीयं क्षुधिताय च भोजनम् ॥5॥

लोभात्क्रोधः प्रभवति लोभात्कामः प्रजायते ।
लोभान्मोहश्च नाशश्च लोभः पापस्य कारणम् ॥6॥

तक्षकस्य विषं दन्ते मक्षिकायाश्च मस्तके ।
वृश्चिकस्य विषं पुच्छे सर्वाङ्गे दुर्जनस्य तत् ॥7॥

उत्सवे व्यसने चैव दुर्भिक्षे शत्रुविप्लवे ।
राजद्वारे श्मशाने च यस्तिष्ठति स बान्धवः ॥8॥

## Glossary

**Noun : (masc.) : पाठकः** reader **पार्थिवः** king **कलहः** quarrel **चारः** spy **जडः** ignorant, foolish **कामः** desire, wish **तक्षकः** a cobra of that name **वृश्चिकः** scorpion **दुर्भिक्षः** famine **विप्लवः** battle, war.

**(Fem.) : मक्षिका** a fly

**(Neu.) : वित्तम्** wealth **चित्तम्** mind **व्रणम्** wound **व्यसनम्** difficulty

**Adjective : सुस्वर** having sweet tone **पिपासित** thirsty **क्षुधित** hungry

**Pronoun : इतरे** others

**Compound :** जीवितयौवने (जीवितं च यौवनं च - जीवितयौवने । इतरेतर द्वन्द्वः) । चलाचलम् (चलं च अचलं च - चलाचलम् । समाहार द्वन्द्व) । सर्वाङ्गे (सर्वम् च तत् अङ्गं च सर्वाङ्गम्, तस्मिन् । कर्मधारय तत्पुरुष)। शत्रुविप्लवे (शत्रूणां विप्लवः शत्रुविप्लवः, तस्मिन्। षष्ठी तत्पुरुष) । राजद्वारे (राज्ञः द्वारम् राजद्वारम्, तस्मिन्। षष्ठी तत्पुरुष) ।

**Root : (First Gana) (Parasmaipada) जीव् (जीवति)** to live

**(Atmanepada) : प्र + जन् > जा (प्रजायते)** to be born, to produce

## Notes

**(1) Meaning : माधुर्यम्** sweetness **अक्षरव्यक्तिः** clear pronunciation of sound **पदच्छेदः** division of stanzas **धैर्यम्** patience **लयसमर्थम्** in keeping with the beat **गावः** cows **देयम्** should be given.

**(2) Sandhi :** पदच्छेदस्तु (पदच्छेदः तु) । षडेते (षट् एते) । चलाचलमिदम् (चल-अचलम् इदम्) । कीर्तिर्यस्य (कीर्तिः यस्य) । राजानश्चक्षुर्भ्यामितरे (राजानः चक्षुर्भ्याम् इतरे) । लोभान्मोहश्च नाशश्च (लोभात् मोहः च नाशः च)। मक्षिकायाश्च (मक्षिकायाः च)। यस्तिष्ठति (यः तिष्ठति) ।

## Exercises

**1. विकल्पेभ्यः समुचितम् उत्तरं चित्वा लिखत ।**

(1) चलाचले संसारे किं निश्चलम् ? ◯

(क) यौवनम् (ख) कीर्तिः (ग) वित्तम् (घ) चित्तम्

(2) के शान्तिम् इच्छन्ति ? ◯

(क) धनिकाः (ख) पार्थिवाः (ग) साधवः (घ) नीचाः

(3) राजानः कैः पश्यन्ति ? ◯

(क) वेदैः (ख) शास्त्रैः (ग) चारैः (घ) नेत्रैः

(4) पापस्य कारणं किम् ? ◯

(क) अज्ञानम् (ख) क्रोधः (ग) लोभः (घ) कामः

(5) तक्षकस्य विषं कुत्र भवति ? ◯

(क) पुच्छे (ख) सर्वाङ्गे (ग) मस्तके (घ) दन्ते

2. **एकवाक्येन संस्कृतभाषया उत्तरत ।**

(1) जडाय किं देयम् ?

(2) लोभात् किं प्रभवति ?

(3) वृश्चिकस्य विषं कुत्र भवति ?

3. **उदाहरणानुसारं शब्दरूपाणां परिचयं कारयत ।**

**उदाहरणम् :** ज्ञानाय (ज्ञान, अकारान्त-नपुंसकलिङ्गम्, चतुर्थी, एकवचनम्)

(1) गुणाः ..........................................................

(2) मक्षिका ..........................................................

(3) दरिद्राय ..........................................................

(4) लोकात् ..........................................................

(5) उत्सवे ..........................................................

4. **मातृभाषायाम् उत्तरत ।**

(1) How many qualities does a reader have ?

(2) What should be given to poor ?

(3) Whom does a poet believe to be his relative ?

5. **सन्धिविच्छेदं कुरुत ।**

(1) चलाचलमिदम् ।

(2) व्रणमिच्छन्ति ।

(3) पदच्छेदस्तु ।

6. **श्लोकानां पूर्तिः करणीया ।**

(1) चलं चित्तं .......... स जीवति ॥

(2) दरिद्राय धनं .......... च भोजनम् ॥

**Activity**

- Organise Antyakshari of Subhashitas (epigrams).
- Prepare a chart and a manuscript magazine of Subhashitas.
- Recognize the cases used in Subhashitas.

# 6. सर्वं चारुतरं वसन्ते

[Mahakavi Kalidasa is a renowned poet of Sanskrit as well as of the world. He has written a total of seven works of which Malavikagnimitram, Vikramorvashiyam and Abhijnanashakuntalam are plays, Raghuvamsham and Kumarasambhavam are long poems (Mahakavya) and Ritusamharam and Meghadootam are Khandakavyas.

It is believed that Kalidasa was one of the nine gems at the court of Maharaja Vikramaditya. On that basis, it can be estimated that Kalidasa lived during the first century of the Vikrama Era (about 2,000 years ago).

This poet has been hailed as the master of nature as well as of simile. On the one hand, he has personified many objects of nature in Abhijnanashakuntalam, and on the other he has unique, vivid descriptions of nature in Ritusamharam and Meghadootam.

In this lesson, we shall study five verses describing spring (Vasant) from Ritusamharam. We will learn how objects can be described; and also the uses of Tatpurusha Samasa (compound).]

द्रुमाः सपुष्पाः सलिलं सपद्मं
स्त्रियः सकामाः पवनः सुगन्धिः ।
सुखाः प्रदोषा दिवसाश्च रम्याः
सर्वं प्रिये चारुतरं वसन्ते ॥ 1 ॥

वापीजलानां मणिमेखलानां
शशाङ्कभासां प्रमदाजनानाम् ।
आम्रद्रुमाणां कुसुमानतानां
ददाति सौभाग्यमयं वसन्तः ॥ 2 ॥

कर्णेषु योग्यं नवकर्णिकारं
चलेषु नीलेष्वलकेष्वशोकम् ।
शिखासु पुष्पं नवमल्लिकायाः
प्रयान्ति कान्तिं प्रमदाजनानाम् ॥ 3 ॥

गुरूणि वासांसि विहाय तूर्णं
तनूनि लाक्षारसरञ्जितानि ।
सुगन्धिकालागुरुधूपितानि
धत्ते जनः काममदालसाङ्गः ॥ 4 ॥

किं किंशुकैः शुकमुखच्छविभिर्न भिन्नं
किं कर्णिकारकुसुमैर्न हतं मनोजैः ।
यत्कोकिलः पुनरयं मधुरैर्वचोभिः
यूनां मनः सुवदनानिहितं निहन्ति ॥ 5 ॥

– ऋतुसंहारे

## Glossary

**Noun : (masc.) : द्रुमः** tree **प्रदोषः** beginning of a night **प्रमदाजनः** young ladies, women **आम्रद्रुमः** mango tree

**(Neu.) : सलिलम्** water **किंशुकम्** Kinshuk (Kesudo) flower

**Pronoun : सर्वम्** all, every

**Adjective : चारुतर** more beautiful **चल** moving **गुरु** thick

**Adverb : तूर्णम्** quickly, hurriedly

**Compound :** वापीजलानाम् (वापीनाम् जलानि-वापीजलानि, तेषाम् । षष्ठी तत्पुरुष) । मणिमेखलानाम् (मणीनाम् मेखलाः-मणिमेखलाः, तेषाम् । षष्ठी तत्पुरुष) । आम्रद्रुमाणाम् (आम्रस्य द्रुमाः-आम्रद्रुमाः, तेषाम् । षष्ठी तत्पुरुष) । कुसुमानतानाम् (कुसुमैः आनताः-कुसुमानताः, तेषाम् । तृतीया तत्पुरुष) । लाक्षारसरञ्जितानि (लाक्षायाः रसः-लाक्षारसः, षष्ठी तत्पुरुष, लाक्षारसेन रंजितानि-लाक्षारसरंजितानि, तृतीया तत्पुरुष) । कर्णिकारकुसुमैः (कर्णिकारस्य कुसुमानि-कर्णिकारकुसुमानि, तैः । षष्ठी तत्पुरुष) । सुवदनानिहितम् (सुवदनासु निहितम् । सप्तमी तत्पुरुष)

## Notes

**(1) Meaning : सपुष्पाः** with flowers (full of flowers) **सपद्मम्** with lotuses **सकामाः** full of desires, love **वापीजलानाम्** of water of lake, pond **मणिमेखलानाम्** wearing waistband of jewells **शशाङ्कभासाम्** having lustre like moon **कुसुमानतानाम्** bent with the load of flowers **ददाति** gives **नवकर्णिकारम्** fresh Karnikara flower **अलकेषु** in hair **कान्तिं प्रयान्ति** attain beauty **वासांसि** clothes **विहाय** (वि + हा + त्वा > य) leaving, abandoning **तनूनि** thin, flimsy **सुगन्धि-कालागुरु-धूपितानि** full of fragrance of black Agaru (a kind of sandal wood) **धत्ते** holds **काम-मद-अलस-अङ्गः** having a body feeling lethargy due to ecstacy of love **शुक-मुखच्छविभिः** bright like the beak of a parrot **वचोभिः** by words, by cooing **सुवदना-निहितम्** to one residing in a beautiful faced woman **निहन्ति** kills **यूनाम्** of youths

**(2) Sandhi :** पुनरयम् (पुनः अयम्) । दिवसश्च (दिवसः च) । शुकमुखच्छविभिर्न (शुकमुखछविभिः न) । (Similar Sandhi is there in words like कर्णिकारकुसुमैर्न, मधुरैर्वचोभिः).

## Exercises

**1. विकल्पेभ्यः समुचितम् उत्तरं चित्वा लिखत ।**

(1) वसन्ते पवनः कीदृशो भवति ? ◯

(क) सुगन्धिः (ख) कठोरः (ग) मृदुः (घ) उष्णः

(2) कः मधुरैः वचोभिः मनः निहन्ति ? ◯

(क) मयूरः (ख) वायसः (ग) कोकिलः (घ) चटकः

(3) रेखाङ्कितपदस्य समासनाम लिखत । – <u>वापीजलानां</u> सौभाग्यं ददाति । ◯

(क) तत्पुरुषः (ख) षष्ठीतत्पुरुषः (ग) द्वन्द्वः (घ) इतरेतरद्वन्द्वः

(4) 'पद्म' शब्दस्य अर्थः कः ? ◯

(क) lotus (ख) leg

(ग) wooden clogs (पादुका) (घ) crop

(5) 'वदनम्' शब्दस्य पर्यायशब्दं चित्वा लिखत । ◯

(क) वादः (ख) मुखम् (ग) वादनम् (घ) वाद्यम्

**2. अधोलिखितानां प्रश्नानां संस्कृतभाषया उत्तराणि लिखत ।**

(1) वसन्तः सौभाग्यरसं कस्मै ददाति ?

(2) अलकाः कीदृशाः सन्ति ?

(3) लाक्षारसरञ्जितानि वासांसि कीदृशानि सन्ति ?

(4) यूनां मनः कः हन्ति ?

(5) वसन्ते जलं कीदृशं भवति ?

**3. मातृभाषायाम् उत्तराणि लिखत ।**

(1) What does the Spring season give and to whom ?

(2) On the basis of poem write five sentences on the Spring.

**4. क-विभागं ख-विभागेन सह यथार्थरीत्या संयोजयत ।**

| क | ख |
|---|---|
| (1) सलिलम् | (1) अलकेषु |
| (2) प्रदोषाः | (2) विहाय |
| (3) प्रमदाजनानाम् | (3) तनूनि वासांसि |
| (4) गुरूणि वासांसि | (4) सपद्मम् |
| (5) जनः धत्ते | (5) सुखाः |
| | (6) पवनः |

**Activity**

- Collect other such descriptions of the Spring from the Sanskrit literature and write it.

•

# 7. संहतिः कार्यसाधिका

[Hitopadesha is a famous collection of stones in Sanskrit. The writer is Pandit Narayana. It is believed that this work was composed in the 9th century A.D. In this work, there are many fables which have a moral. One of those stories is presented here.

In this story the importance of organization is described, but the background has been presented in a very different manner. If we are constantly suspicious, we may not be able to get anything to eat or drink. Hence, one should not be suspicious and get into one's work with courage. When one begins to do this, if problems are created due to qualities like greed then it is organization which helps. This is the moral that can be got from this story.

If the animal kingdom can live in an organization, human society too should try to live in a similar manner. This is also suggested in this story. As you look at the story from the point of values, also remember that you have to learn the various past tense forms of the verbs used in this lesson.]



अस्ति गोदावरीतीरे विशालः शाल्मलीतरुः । विविधेभ्यः देशेभ्यः समागताः बहवः विहगाः तत्र रात्रौ निवसन्ति । तेषु लघुपतनकनामा वायसः अपि एकतमः अस्ति । अथ कदाचित् प्रभातकाले स वायसः कृतान्तं द्वितीयम् इव अटन्तं व्याधमपश्यत् । तमवलोक्य सोऽचिन्तयत्, 'अद्य प्रातरेव अनिष्टदर्शनं संजातम्, न जाने तत् किमनभिप्रेतं दर्शयिष्यति ।' इति विचिन्त्य स व्याकुलः संजातः ।

अथ तेन व्याधेन तण्डुलकणान् विकीर्य जालं विस्तीर्णम् । स च वृक्षस्य पृष्ठभागे प्रच्छन्नो भूत्वा अतिष्ठत् । तस्मिन्नेव काले चित्रग्रीवनामा कपोतराजः परिवारेण सह गगने व्यसर्पत् । भूमौ विकीर्णान् तण्डुलकणान् दृष्ट्वा कपोताः लुब्धाः अभवन् । ततः स कपोतराजः तण्डुलकणलुब्धान् कपोतान् अकथयत्, 'कुतोऽत्र निर्जने वने तण्डुलकणानां सम्भवः ? तन्निरूप्यताम् तावत् । भद्रमिदं न पश्यामि । अनेन तण्डुलकणलोभेन अस्माकं महदनिष्टमपि भवितुमर्हति । अतः सर्वथा अविचारितं कर्म न कर्तव्यम् । यतः -

**सुजीर्णमन्नं सुविचक्षणः सुतः**
**सुशासिता श्रीः नृपतिः सुसेवितः ।**
**सुचिन्त्य चोक्तं सुविचार्य यत्कृतं**
**सुदीर्घकालेऽपि न याति विक्रियाम् ।।**

एतद्वचनं श्रुत्वा कश्चित् कपोतः सदर्पमवदत्, "आः ! किमेवमुच्यते ?

**वृद्धानां वचनं ग्राह्यम् आपत्काले ह्युपस्थिते ।**
**सर्वत्रैवं विचारेण भोजनेप्यप्रवर्तनम् ॥**

उक्तं च –

**शङ्काभिः सर्वमाक्रान्तमन्नं पानं च दुर्लभम् ।**
**प्रवृत्तिः कुत्र कर्तव्या जीवितव्यं कथं नु वा ॥"**

तस्य तद्वचनं श्रुत्वा सर्वे कपोताः तत्र जाले उपाविशन् । अनन्तरं ते सर्वे जालेन बद्धाः अभवन् ।



अथ जालबद्धाः ते यस्य वचनेन तत्र समपतन् तस्य कपोतस्य तिरस्कारं कुर्वन्ति स्म । तस्य तिरस्कारं श्रुत्वा चित्रग्रीवः अवदत्, "विपत्काले विस्मय एव कापुरुषलक्षणम् । तदत्र धैर्यमवलम्ब्य इदानीमेवं क्रियताम् । सर्वैः एकचित्तीभूय जालमादाय उड्डीयताम् । यतः –

**अल्पानामपि वस्तूनां संहतिः कार्यसाधिका ।**
**तृणैर्गुणत्वमापन्नैः बध्यन्ते मत्तदन्तिनः ॥"**

इति विचिन्त्य सर्वे कपोताः जालमादाय उत्पतिताः । ततः स व्याधः तान् जालापहारकान् अवलोक्य पश्चात् धावति । परन्तु तान् सुदूरं गतान् दृष्ट्वा व्याधः प्रतिनिवृत्तः । लुब्धकं निवृत्तं दृष्ट्वा चित्रग्रीवः अवदत्, "हिरण्यकनामकस्य मम मित्रस्य मूषकराजस्य समीपे वयं गच्छामः । स अस्मान् बन्धनात् मुक्तान् करिष्यति ।" ततः ते मूषकराजस्य समीपं समगच्छन् । चित्रग्रीवस्य मित्रेण मूषकराजेन स्वकीयैः तीक्ष्णैः दन्तैः सर्वेषां बन्धनानि छिन्नानि । चित्रग्रीवोऽपि हिरण्यकस्य आभारं मत्वा सपरिवारः यथेष्टदेशान् समगच्छत् ।

## Glossary

**Noun : (masc.) :** **शाल्मलीतरुः** silk-cotton tree **विहगः** bird **वायसः** crow **कृतान्तः** Yamaraj, god of death **व्याधः** hunter **तण्डुलकणः** rice grain **कपोतः** pigeon, dove **कापुरुषः** coward **विस्मयः** astonishment **प्रतीकारः** સામનો **मूषकराजः** king of mice.

**Fem. :** **श्रीः** Lakshmi **विक्रिया** change **संहतिः** unity **कार्यसाधिका** that which accomplishes work

**Neu :** **जालम्** net **भद्रम्** good, auspicious **अनिष्टम्** not likeable, bad **गुणत्वम्** becomes strong like rope, the form of a rope.

**Pronoun :** **तेषु** in them **अनेन** by this **अस्माकम्** our **एतत्** this (neu.) **सर्वे** all **ते** they (masc.) **यस्य** whose **तान्** to them (masc.) **सर्वेषाम्** of all.

**Adjective :** **समागत** have come, have arrived **एकतम** one of many **विकीर्ण** scattered **महत्** huge **अविचारित** without thinking **सुजीर्णम्** easily digestible, which can be digested **सुविचक्षण** very clever, genius **सुशासित** well-governed **सुसेवितः** having been served well **अल्प** little, less

कर्तव्य worthy to be done ग्राह्य fit to be accepted (received) लभ्य worthy to be obtained / got आक्रान्त surrounded लुब्ध greedy आपन्न been attained मत्त intoxicated, proud छिन्न cut उक्त told, said

**Adverb :** अस्ति is (indicates shows presence or existence अपि also प्रातरेव in the morning only तावत् that much सर्वथा in all respect आः Oh ! (shows anger, grief and disagreement) सर्वत्र everywhere कुत्र where कथम् why नु certainly वा or तत्र there अथ adverb showing beginning (commencement) now, तदत्र so here इदानीम् at present एवम् thus इति thus (suggesting ending)

**Compound :** गोदावतीतीरे (गोदावर्याः तीरम् – तस्मिन् । षष्ठी तत्पुरुष) । शाल्मलीतरुः (शाल्मल्याः तरुः । षष्ठी तत्पुरुष) । प्रभातकाले (प्रभातस्य कालः – प्रभातकालः, तस्मिन्, षष्ठी तत्पुरुष) । अनिष्टदर्शनम् (अनिष्टस्य दर्शनम्, षष्ठी तत्पुरुष) । तण्डुलकणान् (तण्डुलस्य कणाः, तान् । षष्ठी तत्पुरुष) । पृष्ठभागे (पृष्ठस्य भागः, तस्मिन् । षष्ठी तत्पुरुष) । कपोतराजः (कपोतनाम् राजा, कपोतराजः । षष्ठी तत्पुरुष) । तण्डुलकणलुब्धान् (तण्डुलकणैः लुब्धाः । तण्डुलकणलुब्धाः, तान् । तृतीया तत्पुरुष) । तण्डुलकणलोभेन (तण्डुलकणानां लोभः, तेन । षष्ठी तत्पुरुष) । आपत्काले (आपदः कालः, तस्मिन् । षष्ठी तत्पुरुष) । जालबद्धाः (जालेन बद्धाः । तृतीया तत्पुरुष) । विपत्काले (विपदः कालः, तस्मिन् । षष्ठी तत्पुरुष) । कापुरुषलक्षणम् (कापुरुषस्य लक्षणम् । षष्ठी तत्पुरुष) । कार्यसाधिका (कार्यस्य साधिका । षष्ठी तत्पुरुष) । मूषकराजम् (मूषकानां राजा, मूषकराजः, तम् । षष्ठी तत्पुरुष) ।

**Participle :** अवलोक्य (अव + लुक् + त्वा > य) । विचिन्त्य (वि + चिन्त् + त्वा > य) । भूत्वा (भू + त्वा) । सुचिन्त्य (सु + चिन्त् + त्वा > य) । सुविचार्य (सु + वि + चर् > चार् + त्वा > य) । श्रुत्वा (श्रु + त्वा) । अवलम्ब्य (अव + लम्ब् + त्वा > य) । एकचित्तीभूय (एकचित्त + भू + त्वा > य) । आदाय (आ + दा + त्वा > य) । दृष्ट्वा (दृश् + त्वा) । मत्वा (मन् + त्वा) ।

**Root : (First Gana) (Parasmaipada)** नि + वस् (**निवसति**) to reside, to stay वि + सृप् (**विसर्पति**) to crawl, to arrive उप + विश् (**उपविशति**) to sit near सम् + पत् (**सम्पतति**) to fall गम् – गच्छ् (**गच्छति**) to go

## Notes

**(1) Meaning :** कृतान्तमिव अटन्तम् moving like Yamaraja अनभिप्रेतम् not desirable दर्शयिष्यति will show विस्तीर्णम् spread प्रच्छन्नो भूत्वा hiding तन्निरूप्यताम् think / decide about it भद्रमिदं न पश्यामि I do not find this (it) good or auspicious न याति विक्रियाम् does not undergo any change सदर्पम् arrogantly, proudly किमेवमुच्यते why do you say like this ? भोजनेप्यप्रवर्तनम् action cannot be done even for food शङ्काभिः with doubt सर्वमाक्रान्तम् over spread / surrounded तिरस्कारम् to (acc.) criticism, to (acc.) scolding विपत्काले in difficulty विस्मय एव कापुरुषलक्षणम् to be surprised is a characteristic feature of a coward एकचित्तीभूय being of one mind आदाय taking उड्डीयताम् fly away तृणैर्गुणत्वमापन्नैः by the blades of grass which have attained the strength (form) of a rope. बध्यन्ते are tied मत्तदन्तिनः intoxicated elephants जालापहारकान् to those carrying away the net प्रतिनिवृत्तः came back, returned यथेष्टदेशान् to the selected places

**(2) Sandhi :** सोऽचिन्तयत् (सः अचिन्तयत्) । प्रातरेव (प्रातः एव) । तन्निरूप्यताम् (तत् निरूप्यताम्) । सुदीर्घकालेऽपि (सुदीर्घकाले अपि) । ह्युपस्थिते (हि उपस्थिते) । सर्वत्रैवम् (सर्वत्र एवम्) । भोजनेप्यप्रवर्तनम् (भोजने अपि अप्रवर्तनम्) । तृणैर्गुणत्वमापन्नैः (तृणैः गुणत्वम् आपन्नैः) । चित्रग्रीवोऽपि (चित्रग्रीवः अपि) ।

## Exercises

**1. विकल्पेभ्यः समुचितम् उत्तरं चित्वा लिखत ।**

(1) प्रभातकाले वायसः कम् अपश्यत् ? ◯

(क) कपोतम् (ख) व्याधम् (ग) वृक्षम् (घ) मूषकम्

(2) गगने कः सपरिवारः व्यसर्पत् ? ◯

(क) वायसः (ख) पक्षिराजः (ग) चित्रग्रीवः (घ) मयूरः

(3) विपत्काले किं करणीयम् ? ◯

(क) विस्मयस्य अवलम्बनम् (ख) प्रतिकारः

(ग) पलायनम् (घ) धैर्यस्य अवलम्बनम्

(4) तृणैर्गुणत्वमापन्नैः के बध्यन्ते ? ◯

(क) मत्तदन्तिनः (ख) सिंहाः (ग) कपोताः (घ) मूषकाः

(5) मूषिकराजेन कपोतानां बन्धनानि केन छिन्नानि ? ◯

(क) दन्तैः (ख) मुखेन (ग) अस्त्रेण (घ) शस्त्रेण

(6) सः तीक्ष्णै दन्तैः जालं .............. प्रायतत । ◯

(क) छित्त्वा (ख) छेदनीयं (ग) छेत्तुम् (घ) छिन्नं

(7) 'वयम्' पदस्य एकवचनम् किम् ? ◯

(क) अहम् (ख) त्वम् (ग) सः (घ) आवाम्

(8) रेखाङ्कितपदस्य समासनाम लिखत । – व्याधेन <u>तण्डुलकणान्</u> विकीर्य जालं विस्तीर्णम् । ◯

(क) षष्ठीतत्पुरुषः (ख) द्वन्द्वः (ग) द्वितीयातत्पुरुषः (घ) समाहारद्वन्द्वः

(9) 'स्म' प्रयोगं कुरुत ।

विहगाः तत्र न्यवसन् । ◯

(क) न्यवसन्ति स्म (ख) निवसन्ति स्म (ग) निवसति स्म (घ) निवसन् स्म

**2. एकवाक्येन संस्कृतभाषया उत्तरत ।**

(1) तण्डुलकणान् अवलोक्य कपोताः कीदृशाः अभवन् ?

(2) बद्धाः कपोताः कं तिरस्कुर्वन्ति स्म ?

(3) अल्पानां वस्तूनां संहतिः कीदृशी भवति ?

(4) जालेन सह उत्पतिताः विहगाः कुत्र गच्छन्ति ?

(5) भूतले शङ्काभिः किम् आक्रान्तं भवति ?

**3. रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत ।**

(कदा, केन, कस्य, कम्, किं कृत्वा, कुत्र, किम्)

(1) गोदावरीतीरे विशाल: शाल्मलीतरु: अस्ति ।

(2) व्याधेन जालं विस्तीर्णम् ।

(3) व्याधेन तण्डुलकणान् विकीर्य जालं विस्तीर्णम् ।

(4) वायस: प्रभातकाले व्याधम् अपश्यत् ।

(5) चित्रग्रीवस्य मित्रं मूषकराज: अस्ति ।

**4. घटनाक्रमानुसारं वाक्यानि लिखत ।**

(1) अनन्तरं ते सर्वे जालेन बद्धा: अभवन् ।

(2) मूषकराजेन स्वकीयै: तीक्ष्णै: दन्तै: सर्वेषां बन्धनानि छिन्नानि ।

(3) वायस: कृतान्तम् इव द्वितीयम् अटन्तं व्याधम् अपश्यत् ।

(4) तदत्र धैर्यमवलम्ब्य इदानीमेवं क्रियताम् ।

(5) वृद्धानां वचनम् आपत्काले ग्राह्यम् एव ।

(6) इति विचिन्त्य कपोता: सर्वे जालमादाय उत्पतिता: ।

**5. मातृभाषायाम् उत्तराणि लिखत ।**

(1) What did the crow think on seeing the hunter ?

(2) What did Chitragriva say to pigeons, tempted by rice grains ?

(3) What was the reaction of the arrogant pigeon to the words of the old ?

(4) How did pigeons free themselves from the net ?

**6. मातृभाषायाम् अनुवादं कुरुत ।**

(1) विविधेभ्य: देशेभ्य: समागता: विहगा: तत्र रात्रौ निवसन्ति ।

(2) चित्रग्रीवनामा कपोतराज: परिवारेण सह गगने व्यसर्पत् ।

(3) तस्य तद्वचनं श्रुत्वा सर्वे कपोता: तत्र जाले उपाविशन् ।

(4) व्याध: तान् जालापहारकान् अवलोक्य पश्चात् धावति ।

(5) तीक्ष्णै: दन्तै: बन्धनानि छिन्नानि ।

### Activity

- Write in your own words another story from 'Hitopadesha'.
- Translate the entire chapter into English.

# 8. काषायाणां कोऽपराधः

[Kakasaheb Kalelakar worked with Mahatma Gandhi for a long time and had the opportunity to stay with him, to travel with him and to exchange ideas with him.

Of the many incidents of this period, Kakasaheb Kalelakar has, because of his literary prowess, given aesthetic form to many of them. Of these, many provide us with inspiration even today. One such interesting incident which was written by Kakasaheb Kalelakar in Gujarati, has been translated into simple Sanskrit, edited and presented here as a lesson.

The main moral of this story is that one should not allow one's position to become an obstacle in the process of social service. Moreover, all of us should also realize that there is no permanent relationship between religion and attire.]

महात्मा गान्धिमहोदयः स्वातन्त्र्यान्दोलनं प्रारभत । अस्यान्दोलनस्य निखिलोऽपि व्यवहारः प्रारम्भेषु दिवसेषु साबरमती-आश्रमे एव प्राचलत् । एकस्मिन् दिवसे स्वामी सत्यदेवः आश्रमम् आगच्छत् । सः देशस्य स्वतन्त्रतार्थं कार्यरतस्य गान्धिमहोदयस्य कार्येण अतीव प्रभावितः प्रसन्नः चासीत् । सः गान्धिमहोदयायाकथयदहं भवतः आश्रमे प्रवेशं निवासं च इच्छामि । देशस्य स्वतन्त्रतायै कार्यं कर्तुं ममापि महतीच्छा वर्तते ।



सत्यदेवस्य प्रस्तावं गान्धिमहोदयः स्वीकृत-वान् । गान्धिमहोदयः अकथयत् - "साधु, स्वागतमत्र भवतः । आश्रमोऽयं भवत एव, किन्तु आश्रमप्रवेशात् पूर्वं भवता काषायवस्त्राणां त्यागः करणीयः ।" गान्धिमहोदयस्य आदेशं श्रुत्वा आश्चर्यान्वितः स्वामिसत्यदेवः मनसि अकुप्यत् । किन्तु सः गान्धिमहोदयस्य पुरतः निजरोषं नाप्रकटयत् । सोऽकथयत्, "कथं काषायवस्त्राणां त्यागः ? काषायवस्त्राणां कोऽपराधः ? अहं संन्यासिजनः । संन्यासिनः काषायवस्त्राणि परिधारयन्ति । अहं काषायवस्त्राणां त्यागं कर्तुं कथं प्रवृत्तो भवामि ।"

स्वामिसत्यदेवस्य वचनं श्रुत्वा शान्तस्वरेण गान्धिमहोदयः अकथयत्, "भवता यदुक्तं तत्सत्यमस्ति । किन्तु भवान् संन्यासस्य त्यागं करोतु इति न ममाशयः । केवलं काषायवस्त्राणां त्यागं कर्तुं वदामि ।"

गान्धिमहोयदस्य कथनतात्पर्यमजानानः सत्यदेवः विचारमुद्रायां स्थितः, मौनं चावलम्बितवान् ।

तस्य तादृशीं मनोदशाम् अवगम्य गान्धिमहोदयः स्वकीयमाशयं स्पष्टं कर्तुं शान्तभावेन मृदुभाषया च सत्यदेवायाकथयत् । – "शृणोतु भवान् सावधानेन मनसा । वयं अन्येषां सेवां कर्तुं प्रवृत्ताः स्मः । एतदेवास्माकं ध्येयमस्ति । भवान् जानात्येव यदस्माकं देशे जनाः काषायवस्त्रधारिणः संन्यासिनः सेवां कर्तुं सदैव समुत्सुकाः भवन्ति । यदा भवान् सेवाकार्याय प्रवृत्तः भविष्यति तदा काषायवस्त्रधारिणं भवन्तं दृष्ट्वा एकतः ते भवतः सेवाकार्यं न अङ्गीकरिष्यन्ति, अपरतः ते भवतः सेवां कर्तुं प्रवृत्ताः भविष्यन्ति । अनेन किमस्माकं ध्येयस्य हानिः न भविष्यति ? संन्यासस्तु मनोगतः सङ्कल्पः एव । तस्य परिधानेन सह सम्बन्धः कयापि दृष्ट्या न योग्यः । अहं निश्चितं मन्ये यत् काषायवस्त्राणां त्यागेन संन्यासत्यागः नैव भविष्यति । अतः विचारयतु भवान्, तदनन्तरं यद्योग्यम् तत्करोतु ।"

गान्धिमहोदयस्य एतादृशं वचनं श्रुत्वा स्वामिसत्यदेवस्य संशयः तस्मिन्नेव क्षणे व्यपगतः । सः काषायवस्त्राणां त्यागं कृत्वा सेवाकार्ये आत्मानं योजयितुं सन्नद्धोऽभवत् ।

## Glossary

**Noun : (masc.) : निजरोषः** self-anger **अपराधः** fault **सङ्कल्पः** determination, intension

**(Fem.) : विचारमुद्रा** thoughtful posture **मनोदशा** mental state **हानिः** loss

**(Neu.) : आन्दोलनम्** movement (revolutionary) **काषायवस्त्रम्** saffron clothes (The clothes worn by Sanyasis is of saffron colour.) **मौनम्** silence **ध्येयम्** aim.

**Pronoun : एकस्मिन्** in one **भवतः** your (masc.) **अन्येषाम्** of others **अस्माकम्** our **भवन्तम्** to you

**Adjective : निखिल** whole, complete **कार्यरत** engrossed in work **प्रसन्न** happy, joyful **महती** great, big **स्वकीय** one's own **मनोगत** remaining in mind **सन्नद्ध** ready, fully equipped.

**Adverb : अतीव** very much **साधु** well **एकतः** on one side **अपरतः** on other side

**Compound :** स्वातन्त्र्यान्दोलनम् (स्वातन्त्र्यस्य आन्दोलनम् । षष्ठी तत्पुरुष) । कार्यरतस्य (कार्येषु रतः – कार्यरतः, तस्य । सप्तमी तत्पुरुष) । आश्रमप्रवेशात् (आश्रमस्य प्रवेशः – आश्रमप्रवेशः, तस्मात् । (षष्ठी तत्पुरुष) । निजरोषम् (निजस्य रोषः निजरोषः, तम् । षष्ठी तत्पुरुष) । कथनतात्पर्यम् कथनस्य तात्पर्यम् । षष्ठी तत्पुरुष) । विचारमुद्रायाम् (विचारस्य मुद्रा विचारमुद्रा, तस्याम् । षष्ठी तत्पुरुष) । मनोदशाम् (मनसः दशा, मनोदशा, ताम् । षष्ठी तत्पुरुष) । सेवाकार्याय (सेवायाः कार्यम् सेवाकार्यम्, तस्मै । षष्ठी तत्पुरुष) । मनोगतः (मनः गतः, द्वितीया तत्पुरुष) । संन्यासत्यागः (संन्यासस्य त्यागः । षष्ठी तत्पुरुष) ।

**Participle :** कर्तुम् (कृ + तुम्) । श्रुत्वा (श्रु + त्वा) । अवगम्य (अव + गम् + त्वा > य) । दृष्ट्वा (दृश् + त्वा) योजयितुम् (युज्-(प्रेरक) + तुम्) ।

**Root : (First Gana)** (Parasmaipada) **प्र + चल् (प्रचलति)** to walk **आ + गम् > गच्छ् (आगच्छति)** to come **इष्-इच्छ् (इच्छति)** to desire.

(Atmanepada) **प्र + आ + रभ् ( प्रारभते )** to begin, to start

**(Fourth Gana)** (Parasmaipada) **कुप् ( कुप्यति )** to be angry, to get angry

**(Tenth Gana)** (Parasmaipada) **वि + चर् ( विचारयति )** to think

## Notes

**(1) Meaning : प्रभावित:** is impressed **प्रसन्न:** happy, pleased **प्रस्तावम्** to proposal, suggestion **स्वीकृतवान्** has accepted **करणीय:** should be done **आश्चर्यान्वित:** one who is astonished **मनसि** in mind **न अप्रकटयत्** did not reveal **संन्यासिजना:** Samnyasis, mendicants **परिधारयन्ति** wear **सन्** been **मम आशय:** my intention **अजानान:** not knowing **मौनम् अवलम्बितवान्** remained silent **प्रवृत्ता: स्म:** we have become ready **समुत्सुका:** eager **न अङ्गीकरिष्यन्ति** will not accept **परिधानेन सह** with clothes (attire) **कयापि दृष्ट्या** in any way (from any point of view) **विचारयतु भवान्** you keep thinking **तदनन्तरम्** thereafter **व्यपगत:** went away

**(2) Sandhi :** अस्यान्दोलनस्य (अस्य आन्दोलनस्य) । निखिलोऽपि (निखिल: अपि) । गान्धिमहोदयायाकथयदहम् (गान्धिमहोदयाय अकथयत् अहम्) । ममापि (मम अपि) । महतीच्छा (महती इच्छा) । नाप्रकटयत् (न अप्रकटयत्) । प्रवृत्तो भवामि (प्रवृत्त: भवामि) । एतदेवास्माकम् (एतत् एव अस्माकम्) । जानात्येव (जानाति एव) । संन्यासस्तु (संन्यास: तु) । यद्योग्यम् (यत् योग्यम्) ।

## Exercises

**1. निम्नप्रश्नानाम् उत्तराणि समुचितं विकल्पं चित्वा लिखत ।**

(1) स्वातन्त्र्यान्दोलनस्य व्यवहार: आरम्भदिनेषु कुत्र प्राचलत् ? ◯

(क) साबरमती-आश्रमे (ख) वर्धा-आश्रमे (ग) दांडीसमीपे (घ) पालडी-ग्रामे

(2) गान्धिमहोदयस्य कार्येण क: प्रभावित: प्रसन्न: च आसीत् ? ◯

(क) सत्यदेव: (ख) महादेव: (ग) निपुणस्वामी (घ) जवाहरलाल:

(3) गान्धिमहोदयस्य पुरत: किं कर्तुं सत्यदेव: समर्थ: न अभवत् ? ◯

(क) सेवाकार्यम् (ख) रोषं प्रकटयितुम् (ग) रोषं गोपयितुम् (घ) आश्रमं गन्तुम्

(4) सत्यदेवस्य वचनं श्रुत्वा गान्धिमहोदय: कथम् अवदत् ? ◯

(क) शान्तस्वरेण (ख) क्रुद्धस्वरेण (ग) श्रान्तस्वरेण (घ) दृढसंकल्पेन

(5) संन्यास: कीदृश: सङ्कल्प: वर्तते । ◯

(क) मननीय: (ख) मोहगत: (ग) मनोगत: (घ) काषायपरिधानस्य

**2. अधोलिखितानां प्रश्नानाम् एकवाक्येन संस्कृतभाषया उत्तरं लिखत ।**

(1) सत्यदेवः कः आसीत् ?

(2) गान्धिमहोदयस्य ध्येयं किम् आसीत् ?

(3) जनाः कस्य सेवां न अङ्गीकुर्वन्ति ?

(4) कस्य त्यागेन संन्यासस्य त्यागः न भवति ?

(5) स्वामिसत्यदेवः किमर्थं सन्नद्धः अभवत् ?

**3. अधोलिखितानि क्रियापदानि वर्तमानकालस्य (लट्लकारस्य) रूपत्वेन परिवर्तयत ।**

(1) प्रारभत (2) आगच्छत् (3) अकथयत्

(4) भविष्यन्ति (5) अकुप्यत्

**4. रेखाङ्कितपदानां स्थाने प्रकोष्ठात् उचितपदं चित्वा प्रश्नवाक्यं रचयत ।**

(के, केषाम्, कीदृशेन, कस्य, कः)

(1) सत्यदेवस्य प्रस्तावं <u>गान्धिमहोदयः</u> स्वीकृतवान् ।

(2) <u>संन्यासिजनाः</u> काषायवस्त्राणि परिधारयन्ति ।

(3) केवलं <u>काषायवस्त्राणां</u> त्यागं कर्तुं वदामि ।

(4) शृणोतु भवान् <u>सावधानेन</u> मनसा ।

(5) ते <u>भवतः</u> सेवाकार्यं न अङ्गीकरिष्यन्ति ।

**5. शब्दरूपैः रिक्तस्थानानि पूरयत ।**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| (1) | ................ | ................ | दिवसेषु |
| (2) | कार्यरतस्य | ................ | ................ |
| (3) | ................ | ................ | स्वरैः |
| (4) | ................ | त्यागाभ्याम् | ................ |
| (5) | देशे | ................ | ................ |

**6. उदाहरणानुसारं धातुरूपाणां परिचयं कारयत ।**

**उदाहरणम् :**

| | धातुरूपम् | कालः | पदम् | पुरुषः | वचनम् |
|---|---|---|---|---|---|
| | मन्ये | वर्तमानकालः | आत्मनेपदम् | उत्तमपुरुषः | एकवचनम् |
| (1) | भविष्यन्ति | ................ | ................ | ................ | ................ |

(2) प्राचलत् ................ ................ ................ ................

(3) अकथयत् ................ ................ ................ ................

(4) भवामि ................ ................ ................ ................

**7. प्रदत्तान् शब्दान् प्रयुज्य वाक्यानि रचयत ।**

(1) One day he came to Ashrama.

एक दिवस आश्रम आ + गम् ।

(2) He was very much impressed by work.

कार्य अतीव प्रभावित अस् ।

(3) How can I be ready to give up ?

त्याग कृ+तुम् कथम् प्रवृत्त भू ।

(4) I tell you to give up only saffron clothes.

केवल काषायवस्त्र त्याग वद् ।

**8. कृदन्त-प्रकारं लिखत ।**

(1) विकीर्य ................ ।

(2) भवितुम् ................ ।

(3) आदाय ................ ।

(4) छेत्तुम् ................ ।

(5) धृत्वा ................ ।

**9. मातृभाषया उत्तराणि लिखत ।**

(1) What was going on in the Ashrama ?

(2) Why did Swami Satyadeva wish to gain entry in the Ashrama ?

(3) What did Gandhiji say calmly ?

(4) How do people of our country behave with Samnyasis ?

(5) What did Satyadeva do at last after listening to Gandhiji's word ?

**Activity**

- Visit Sabarmati Ashrama.
- Get information regarding Satyagrah movement during freedom-fight.
- Get and read the book सत्यशोधनम् autobiography of Gandhiji.

# 9. उपकारहतस्तु कर्तव्यः

[मृच्छकटिक-Mricchakatika by Shudraka is a kind of allegorical drama. The theme is based on the lives of ordinary people in society. As the protagonist we have Charudatta who was once a wealthy person but is now poor. As the heroine is a rich courtesan– Vasantasena. The imaginative portrayal of their love by Shudraka makes this work an unique one.

This excerpt is taken from the 10th act of मृच्छकटिक. Shakara, the brother-in-law of the King, kills Vasantasena by suffocating her. For the crime committed by him, Shakara puts the blame on Charudatta. Charudatta is sentenced to death. Fortunately, Vasantasena is alive. By coincidence, there is a change of kingship. Moreover, the fact that Charudatta did not try to kill but that it was Shakara also comes to light. And so Shakara who is now an ordinary citizen is arrested. The conversation that takes place to decide what punishment should be given to Shakara is edited and presented here.

Those in power may succeed in harassing the common, innocent people for sometime but in the end it is they themselves who will be harassed. Moreover, the good person who comes to power does not harbour any feeling of revenge towards the persons who had harmed him earlier. Instead, he has a feeling of pardon and helpfulness and that is the moral that we get from this dialogue. Moreover, how in Sanskrit the indeclinable is used to express feelings felt, is also to be learnt here.]

---

(नेपथ्ये – अरे रे राष्ट्रियश्यालक । एहि एहि । स्वस्य अविनयस्य फलमनुभव ।)

(ततः प्रविशति पुरुषैरधिष्ठितः पश्चाद्बाहुबद्धः शकारः ।)

शकारः : (दिशोऽवलोक्य) समन्ततः उपस्थितः एष राष्ट्रियबन्धः । तत्किमिदानीम् अशरणः शरणं व्रजामि । (विचिन्त्य) भवतु, तमेव शरणवत्सलं गच्छामि । (इत्युपसृत्य) आर्यचारुदत्त । परित्रायस्व परित्रायस्व । (इति पादयोः पतति ।)

(नेपथ्ये – आर्यचारुदत्त ! मुञ्च मुञ्च । व्यापादयाम एनम् ।)

शकारः : (चारुदत्तं प्रति) भो अशरणशरण परित्रायस्व ।

चारुदत्तः : (सानुकम्पम्) अहह । अभयम् अभयं शरणागतस्य ।

शर्विलकः : (सावेगम्) आः अपनीयताम् अयं चारुदत्तपार्श्वात् । (चारुदत्तं प्रति) ननूच्यतां किमस्य पापस्य अनुष्ठीयतामिति ।

**आकर्षन्तु सुबद्ध्वैनं श्वभिः संखाद्यताम् अथ ।**
**शूले वा तिष्ठतामेष पाट्यतां क्रकचेन वा ।।**

चारुदत्तः : किमहं यद् ब्रवीमि तत् क्रियते ।

शर्विलकः : कोऽत्र संदेहः ।

शकारः : भट्टारक चारुदत्त शरणागतोऽस्मि । तत् परित्रायस्व । यत्तव सदृशं तत्कुरु । पुनर्न ईदृशं करिष्यामि ।

(नेपथ्ये) (पौराः व्यापादयत । किंनिमित्तं पातकी जीव्यते ।)

शर्विलकः : अरे रे अपनयत । आर्यचारुदत्त आज्ञाप्यताम् किमस्य पापस्य अनुष्ठीयताम् ।



चारुदत्तः : किमहं यद् ब्रवीमि तत्क्रियते ।

शर्विलकः : कोऽत्र संदेहः ।

चारुदत्तः : सत्यम् ।

शर्विलकः : सत्यम् ।

चारुदत्तः : यद्येवं शीघ्रमयम्....।

शर्विलकः : किं हन्यताम् ।

चारुदत्तः : नहि नहि । मुच्यताम् ।

शर्विलकः : किमर्थम् ।

चारुदत्तः : **शत्रुः कृतापराधः शरणमुपेत्य पादयोः पतितः ।**
**शस्त्रेण न हन्तव्यः**

शर्विलकः : एवम् । तर्हि श्वभिः खाद्यताम् ।

चारुदत्तः : नहि । ..... **उपकारहतस्तु कर्तव्यः** ॥

शर्विलकः : अहो आश्चर्यम् । किं करोमि । वदत्वार्यः ।

चारुदत्तः : तन्मुच्यताम् ।

शर्विलकः : मुक्तो भवतु ।

शकारः : आश्चर्यम् । प्रत्युज्जीवितोऽस्मि । (इति पुरुषैः सह निष्क्रान्तः ।)

## Glossary

**Noun (masc.) : राष्ट्रियश्यालकः** brother-in-law of the king **शकारः** Shakara (He pronounces 'Sha' (श) instead of 'Sa' (स), so he is named as Shakara.) **राष्ट्रियबन्धः** relative of king (brother-in-law) **भट्टारक** Sheth (revered) **शूलः** gibbet, a stake to impale criminals **क्रकचः** a saw

**(Neu.) : फलम्** fruit, result **शस्त्रम्** weapon (a weapon which is held in the hand is शस्त्रम् and that which is thrown is अस्त्रम्)

**Adjective : अशरण:** one, who is without refuge **शरणागत:** one who has approached for shelter **पाप:** sinner **पातकी** one who commits sin, sinner

**Pronoun : स्वस्य** one's own **एष:** this (masc.) **एनम्** to this **अयम्** this **यत्** which **तत्** that

**Adverb : अरेरे** to be used for addressing with surprise, Oh ! **समन्तत:** from every side **इदानीम्** at present **प्रति** towards **भो:** an adverb used to address someone **अहह** used to show mercy (a word to show feeling of compassion - grace) **आ:** used to show anger or dislike **ननु** used to express an intention to get permission **शीघ्रम्** hurriedly, quickly **नहि** not **तर्हि** then **अहो** Oh ! used to show surprise

**Participle : अवलोक्य** (अव + लोक् + त्वा > य) । **सुबद्ध्वा** (सु + बन्ध् + त्वा) । **उपसृत्य** (उप + सृ + त्वा > य)

**Compound :** शरणागतस्य (शरणम् आगत:, तस्य । द्वितीया तत्पुरुष) । चारुदत्तपार्श्वात् (चारुदत्तस्य पार्श्वम् तस्मात् । षष्ठी तत्पुरुष) उपकारहत: (उपकारेण हत: । तृतीया तत्पुरुष) ।

**Root : (Sixth Gana) :** (Parasmaipada) **प्र + विश्** (**प्रविशति**) to enter

## Notes

**(1) Meaning : पुरुषैरधिष्ठित:** protected by men, under watch by king's (men) attendants **पश्चाद्बाहुबद्ध:** whose hands are tied at the back **अभ्युपपन्नशरणवत्सलम्** to one who shows love towards the person seeking refuge **परित्रायस्व** save **मुञ्च** set free **अशरणशरण** refuge for shelterless **व्यापादयाम:** we kill **सानुकम्पम्** with compassion **सावेगम्** with anger **अपनीयताम्** take far away **किम् अनुष्ठीयताम्** what can be done ? **आकर्षन्तु** can be dragged ? **श्वभि:** by dogs **संखाद्यताम्** to be fed to the dogs ? **तिष्ठताम्** be made to stand ? **पाट्यताम्** be cut with (a saw) ? **तत् क्रियते** that would be done **तत्कुरु** do that **पौरा:** people living in (city) **व्यापादयत** kill **जीव्यते** is kept alive **अपनयत** take far away **आज्ञाप्यताम्** give order, give command **किं हन्यताम्** would he be killed ? **मुच्यताम्** set free **कृतापराध:** who has committed a crime, criminal **प्रत्युज्जीवितोऽस्मि** I continue to be alive

## Exercises

**1. अधोलिखितेभ्य: विकल्पेभ्य: समुचितम् उत्तरं चिनुत ।**

(1) पुरुषैरधिष्ठित: शकार: कीदृश: आसीत् ? ◯

(क) पाशबद्ध: (ख) पश्चाद्बाहुबद्ध: (ग) प्रसन्न: (घ) दु:खित:

(2) 'किमहं यद् ब्रवीमि तत् क्रियते' इति वचनम् कस्य ? ◯

(क) नगरजनस्य (ख) शर्विलकस्य (ग) शकारस्य (घ) चारुदत्तस्य

(3) 'एवम् तर्हि श्वभि: खाद्यताम् ।' एतद् वाक्यं क: वदति ? ◯

(क) शूद्रक: (ख) चारुदत्त: (ग) शर्विलक: (घ) शकार:

(4) शकार: - आश्चर्यम् .......... अस्मि । ◯

(क) जीवित: (ख) प्रत्युज्जीवित: (ग) उज्जीवित: (घ) मुक्त:

(5) कः .............. सन्देहः ?

(क) ततः (ख) यतः (ग) अत्र (घ) इतः

(6) सः .............. सह निर्गच्छति ।

(क) पुरुषैः (ख) पुरुषं (ग) पुरुषस्य (घ) पुरुषः

(7) शर्विलकः .............. प्रति पश्यति ।

(क) चारुदत्ताय (ख) चारुदत्तं (ग) चारुदत्तेन (घ) चारुदत्तात्

(8) यदि एवं .............. श्वभिः खाद्यताम् ।

(क) तदा (ख) यत्र (ग) तत्र (घ) तर्हि

**2. रेखाङ्कितपदानां समासप्रकारं लिखत ।**

(1) अहह । अभयम् अभयं <u>शरणागतस्य</u> ।

(2) आः अपनीयताम् अयं <u>चारुदत्तपार्श्वात्</u> ।

(3) <u>उपकारहतः</u> कर्तव्यः ।

**3. संस्कृतभाषया उत्तरं लिखत ।**

(1) शकारः चारुदत्तम् उपसृत्य किं कथयति ?

(2) नेपथ्ये पौराः किं कथयन्ति ?

(3) कृतापराधः शत्रुः यदि शरणमुपेत्य पादयोः पतितः तदा किं करणीयम् ?

(4) उपकारेण कः हतः ?

**4. उदाहरणानुसारं शब्दरूपैः रिक्तस्थानानि पूरयत ।**

**उदाहरणम् :**

| | | | |
|---|---|---|---|
| | पुरुषेण | पुरुषाभ्याम् | पुरुषैः |
| (1) | पापस्य | .................... | .................... |
| (2) | .................... | पादयोः | .................... |
| (3) | .................... | .................... | पौराः |
| (4) | आर्यचारुदत्तम् | .................... | .................... |
| (5) | मुक्तः | .................... | .................... |

**5. मातृभाषया उत्तराणि लिखत ।**

(1) Of what does Shakara have to suffer the result ?

(2) In what form does Shakara view Charudatta now ?

(3) What kind of punishment does Sharvilaka consider to give to Shakara ?

**Activity**

- Read the theme of मृच्छकटिकम् ।
- Read and enact this extract of the play in the classroom.

# 10. दौवारिकस्य सेवानिष्ठा

[Born in Rajasthan, Pandit Ambikadatt Vyas, who made Varanasi his home after being educated there, occupies a special place among the modern Sanskrit writers. He is well-known for his modern work शिवराजविजय - 'Shivarajavijaya'. The style of this Sanskrit novel is easy as well as serious. The flow of the narrative is smooth and holds the attention of the reader.

The novel deals with many of the heroic adventures of Chhatrapati Shivaji. Also included is the saga of his many periodic victories. There were many factors responsible for these victories. Of special importance is the fact that even the lowest of his servants was honest, focussed and faithful to his master. The present excerpt proves this point. A guard, who is performing an ordinary job, is faithful to his master without being attracted by any greed, temptation or avarice. This guard is an ideal even today.

The aim of this lesson is that along with a sense of service honesty too should be instilled in students. Attention should be paid to the formation of past participle and the concord with verbs in the present tense, based on the verbs used in this lesson. You should also learn the correct use of person.]

(एकदा दौवारिकः भव्यमूर्तिं संन्यासिनम् अपश्यत् । ततः तयोः एवं वार्तालापः अभवत् ।)



संन्यासी : कथं अस्मान् संन्यासिनः अपि तिरस्करोषि ।

दौवारिकः : भगवन् प्रणमामि । परन्तु स्वकीयं परिचयम् अदत्वा न कश्चित् प्रवेष्टुम् अर्हति ।

संन्यासी : सत्यम् । क्षान्तः अयं ते अपराधः । किन्तु अद्य प्रभृति त्वं संन्यासिनः पण्डितान् ब्रह्मचारिणः स्त्रियः बालाः च न अवरोद्धुं शक्नोषि ।

दौवारिकः : संन्यासिन् बहूक्तम् । विरम । वयं दौवारिकाः ब्रह्मणः अपि आज्ञां न प्रतीक्षामहे ।

संन्यासी : साधु । मार्गम् आदेशय । महाराजनिकटे गन्तुम् इच्छामि ।

दौवारिकः : न शक्यम् । प्रभाते महाराजस्य सन्ध्योपासनकाले प्रवेशं कर्तुम् अर्हसि । न तु रात्रौ ।

संन्यासी : किम् कोऽपि रात्रौ न प्रविशति ।

दौवारिकः : आहूतान् परिचितान् च परित्यज्य न कोऽपि । विशेषस्तु भवादृशाः ये खलु तुम्बीधारकाः द्वारात् द्वारं भ्रमन्ति ।

संन्यासी : (स्वगतम्) सर्वथा सुयोग्यः अयं दौवारिकः । पुनः इमं परीक्षितुं प्रयतिष्ये । (प्रकाशम्) दौवारिक, अत्र आगच्छ । किमपि कथयितुम् इच्छामि ।

दौवारिकः : (उपसृत्य) कथयतु भवान् ।

संन्यासी : त्वं तु दौवारिकः असि । कदापि धनिकः न भविष्यसि । वनेषु कन्दरासु च वयं विचरामः । सर्वं रसायनतत्त्वं जानीमः ।

दौवारिकः : भवतु नाम । अग्रे अग्रे ।

संन्यासी : यदि मम प्रवेशं त्वं न अवरोधयसि तर्हि तुभ्यं यथेष्टं रसायनं दास्यामि । तेन पञ्चाशत्-तुलापरिमितं ताम्रं सुवर्णं भविष्यति ।

दौवारिकः : आः कपटिन्, विश्वासघातम्

उपदिशसि ? न वयं तादृशाः । कथय कः त्वम् । कुतः आगच्छसि । अहं त्वां कस्यचित् गुप्तचरं मन्ये । दुर्गाध्यक्षं निवेद्य त्वां दण्डयिष्यामि । सः त्वां विज्ञाय यथोचितं करिष्यति ।

संन्यासी : परित्यज परित्यज । नाहं पुनः आगमिष्यामि । नैवं पुनः कथयिष्यामि ।

(दौवारिकः तत् विगण्य तं हस्तेन गृहीत्वा नयति ।)



संन्यासी : (प्रबलप्रकाशदीपस्य समीपे) दौवारिक, अपि जानासि माम् ।

दौवारिकः : (निपुणं निरीक्ष्य) अये आर्यः खलु भवान् । आर्य, क्षन्तुम् अर्हति माम् ।

संन्यासी : (तस्य पृष्ठे हस्तं विन्यस्य) दौवारिक मया ते परीक्षा कृता । त्वं योग्यस्थाने नियुक्तः असि । उत्कोचाय अलोलुपाः त्वादृशाः प्रभूणां पुरस्कारभाजनं भवन्ति । अहं तव प्रामाणिकतां प्रभुसन्निधौ कथयिष्ये । कुत्र वर्तते श्रीमान् । किम् अनुतिष्ठति सम्प्रति सः ।

## Glossary

**Noun : (masc.) : दौवारिकः** doorkeeper **कन्दरः** cave **गुप्तचरः** spy **दुर्गः** fort **उत्कोचः** bribe **वार्तालापः** dialogue, conversation

**(Fem.) : तुम्बी** bowl made from gourd (Mendicants keep this bowl with them and use it as a vessel (pot). **वञ्चना** fraud **तुला** tola, a measure of weight **सन्निधिः** proximity

**(Neu.) : परिचयपत्रम्** identity card **ताम्रम्** copper **पृष्ठम्** the back **भाजनम्** vessel, suitable

**Adjective : आहूत** called **पञ्चाशत्** fifty **परिमित** limited **त्वादृश** like you

**Adverb : प्रभृति** hence forth **सर्वथा** in all respect **कुतः** from where

**Compound :** महाराजनिकटे (महाराजस्य निकटे महाराजनिकटे । षष्ठी तत्पुरुष) । सन्ध्योपासनकाले (सन्ध्याः उपासनम् - सन्ध्योपासनम् । षष्ठी तत्पुरुष । सन्ध्योपासनायाः कालः सन्ध्योपासनाकालः, तस्मिन् । षष्ठी तत्पुरुष) तुलापरिमितम् (तुलया परिमितम् तुलापरिमितम् । तृतीया तत्पुरुष) दुर्गाध्यक्षम् (दुर्गस्य अध्यक्षः दुर्गाध्यक्षः, तम् । षष्ठी तत्पुरुष) । पुरस्कारभाजनम् (पुरस्कारस्य भाजनम् पुरष्कारभाजनम् । षष्ठी तत्पुरुष) प्रभुसन्निधौ (प्रभोः सन्निधिः प्रभुसन्निधिः, तस्याम् । षष्ठी तत्पुरुष) ।

**Root : First Gana** (Parasmaipada) **प्र + नम्** **( प्रणमति )** to bow to **वि + रम्** **( विरमति )** to stop **वि + चर्** **( विचरति )** to wander, to move

(Atmanepada) **प्रति + ईक्ष्** **( प्रतीक्षते )** to wait **परि + ईक्ष्** **( परीक्षते )** to examine, to take a test

## Notes

**(1) Meaning : भव्यमूर्तिम्** to a magnificient form **संन्यासिनः** to mendicants **क्षान्तः अयं ते अपराधः** this fault of yours is forgiven **ब्रह्मचारिणः** to celibates **प्रतिरोधनीयाः** should be stopped **ब्रह्मणः** of Brahma **उक्तम्** said **विहाय** leaving (here, except) **आदेशय** show **विशेषतः** specially **भवादृशाः** like you **तुम्बीधारिणः** holding bowl made of gourd **प्रकाशम्** loudly (Term in drama which instructs to speak in such a way so that all can hear.) **उपसृत्य** approaching **जानीमः** we know **भवतु** may be **पञ्चाशत्-तुला-परिमितम्** measuring fifty tolas **शिक्षयसि** do you teach ? **विज्ञाय** recongnizing **विगणय्य** ignoring **गृहीत्वा** catching **प्रबलप्रकाशदीपस्य** of a lamp having bright light **विन्यस्य** placing on **नियुक्तः** appointed **कथय** you tell, say

**(2) Sandhi :** कोऽपि (कः अपि) । विशेषस्तु (विशेषः तु) ।

## Exercises

**1. अधोलिखितेभ्यः विकल्पेभ्यः समुचितम् उत्तरं चिनुत ।**

(1) दौवारिकाः कस्य आज्ञाम् अपि न प्रतीक्षन्ते ? ◯

(क) संन्यासिनः (ख) ब्रह्मणः (ग) सेनापतेः (घ) नृपतेः

(2) दौवारिकः कम् अपश्यत् ? ◯

(क) संन्यासिनम् (ख) गुप्तचरम् (ग) नृपम् (घ) मन्यते

(3) अहं त्वां गुप्तचरं .......... । ◯

(क) मन्ये (ख) मन्यन्ते (ग) मन्यसे (घ) दुर्गाध्यक्षम्

(4) त्वं कदापि धनिकः न .......... । ◯

(क) भविष्यसि (ख) भविष्यथ (ग) भविष्यति (घ) भविष्यन्ति

(5) 'क्षन्तुम् अर्हति माम्' इति कः वदति ? ◯

(क) दौवारिकः (ख) संन्यासी (ग) गुप्तचरः (घ) दुर्गाध्यक्षः

**2. अधोलिखितानां प्रश्नानाम् एकवाक्येन संस्कृतभाषया उत्तरं लिखत ।**

(1) संन्यासी कुत्र गन्तुम् इच्छति ?

(2) कीदृशाः जनाः प्रभूणां पुरस्कारभाजनानि भवन्ति ?

(3) द्वारात् द्वारं के भ्रमन्ति ?

(4) दौवारिकेन कः दृष्टः ?

(5) संन्यासी कस्य प्रामाणिकतां कथयिष्यति ?

**3. निम्नलिखितानां कृदन्तानां प्रत्ययनिर्देशपूर्वकं प्रकारं लिखत ।**

(1) क्षन्तुम् .................... ....................

(2) गन्तुम् .................... ....................

(3) उपसृत्य .................... ....................

(4) परित्यज्य .................... ....................

**4. अधस्तनानि वाक्यानि ह्यस्तनभूतकाले (लङ्लकारे) परिवर्तयत ।**

(1) त्वं धनिकः भवसि ।

(2) वयं वनेषु वसामः ।

(3) कः अपि रात्रौ न प्रविशति ।

(4) अहं त्वां गुप्तचरं मन्ये ।

**5. रेखाङ्कितपदानां समासप्रकारं लिखत ।**

(1) दौवारिकस्य <u>सेवानिष्ठा</u> उत्तमा आसीत् ।

(2) <u>दुर्गाध्यक्षः</u> निर्णयं करिष्यति ।

(3) संन्यासीनः <u>महाराजनिकटे</u> गन्तुम् इच्छति ।

(4) प्रामाणिकजनाः <u>पुरस्कारभाजनानि</u> भवन्ति ।

**6. उदाहरणानुसारं शब्दरूपाणां परिचयं कारयत ।**

**उदाहरणम् :** पण्डिताः (पण्डित, अकारान्तः, पुल्लिङ्गम्, प्रथमा-बहुवचनम्)

शब्दरूपम्

(1) कन्दरेषु .................... .................... .................... .................... ....................

(2) गुप्तचरम् .................... .................... .................... .................... ....................

(3) उत्कोचाय .................... .................... .................... .................... ....................

(4) दौवारिकेन .................... .................... .................... .................... ....................

**7. सूचनानुसारं धातुरूपैः रिक्तस्थानानि पूरयत ।**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| (1) | .................... | शिक्षयथः | .................... |
| (2) | कथयिष्यामि | .................... | .................... |
| (3) | .................... | .................... | प्रतीक्षामहे |
| (4) | अभवत् | .................... | .................... |
| (5) | .................... | अयच्छताम् | .................... |

**8. प्रदत्तान् शब्दान् प्रयुज्य वाक्यानि रचयत ।**

(1) Students (pupils) bow down to Guru (preceptor).

छात्र, गुरु, प्र+नम्

(2) A gardener prepares a garland of flowers.

मालाकार, पुष्पमाला, रच्

(3) Ganesh writes with a pen.

गणेश, कलम (लेखनी), लिख्

(4) Flowers blossom in the garden (in the morning.)

कुसुम, उद्यान (प्रभात), वि+कस्

(5) A door-keeper enters the palace.

दौवारिक, राजप्रासाद, प्र+विश्

**9. निम्नलिखितानां प्रश्नानाम् उत्तराणि त्रीभिः चतुर्भिः वा वाक्यैः मातृभाषया लिखत ।**

(1) According to the Samnyasi who should not be stopped ?

(2) Who can go to meet the king at night ?

(3) What bribe does Samnyasi give to the door-keeper for entry ?

(4) Write a short note on ‘Door-keeper’s honesty’.

**Activity**

- Enact the dialogue of the lesson.
- Describe in your own words the incidents showing loyalty to service and honesty.
- Write a diary about your loyalty and honesty towards your daily work.

# 11. वेदितव्यानि मित्राणि

[Known as the longest literary work in the entire world is the Mahabharata composed by Maharshi Vyasa. The Mahabharata has about one lakh Shlokas.

There are 18 ‘Parvas’ in the Mahabharata. The first Parva is ‘Adiparva’ while the last is ‘Swargarohanaparva’. In the twelfth one ‘Shantiparva’, solutions to many problems of life have been dealt with.

In the ‘Shantiparva’ there are 365 chapters. These chapters are further internally divided into ‘Rajadharmanushasanaparva’ (1 to 30), ‘Aapaddharmaparva’ (131 to 173) and ‘Mokshaparva’ (174 to 365) etc. Among these, in the ‘Aapaddharmaparva’ there is a dialogue between Bhishma and Yudhishthira which is a teaching on polity. In this there is one occasion where Yudhishthira is advised to maintain friends. During this advice, it is also shown how friends should be, how they are made and how they are helpful to us.]

---

वेदितव्यानि मित्राणि विज्ञेयाश्चापि शत्रवः ।
एतत् सुसूक्ष्मं लोकेऽस्मिन् दृश्यते प्राज्ञसम्मतम् ॥1॥

शत्रुरूपा हि सुहृदो मित्ररूपाश्च शत्रवः ।
सन्धितास्ते न बुध्यन्ते कामक्रोधवशं गताः ॥2॥



नास्ति जातु रिपुर्नाम मित्रं नाम न विद्यते ।
व्यवहाराच्च जायन्ते मित्राणि रिपवस्तथा ॥3॥

यो यस्मिन् जीवति स्वार्थं पश्येत् पीडां न जीवति ।
स तस्य मित्रं तावत् स्याद् यावन्न स्याद् विपर्ययः ॥4॥

मित्रं च शत्रुतामेति कस्मिंश्चित् कालपर्यये ।
शत्रुश्च मित्रतामेति स्वार्थो हि बलवत्तरः ॥ 5 ॥
तन्मित्रं कारणं सर्वं विस्तरेणापि मे शृणु ।
कारणात् प्रियतामेति द्वेष्यो भवति कारणात् ॥ 6 ॥
प्रियो भवति दानेन प्रियवादेन चापरः ।
मन्त्रहोमजपैरन्यः कार्यार्थं प्रीयते जनः ॥ 7 ॥
उत्पन्ना कारणे प्रीतिरासीन्नौ कारणान्तरे ।
प्रध्वस्ते कारणस्थाने सा प्रीतिर्विनिवर्तते ॥ 8 ॥
आत्मरक्षणतन्त्राणां सुपरीक्षितकारिणाम् ।
आपदो नोपपद्यन्ते पुरुषाणां स्वदोषजाः ॥ 9 ॥
शत्रून् सम्यग् विजानाति दुर्बला ये बलीयसः ।
न तेषां चाल्यते बुद्धिः शास्त्रार्थकृतनिश्चया ॥ 10 ॥

## Glossary

**Noun : (masc.) :** **लोकः** world, universe **व्यवहारः** behaviour, conduct, action **स्वार्थः** selfishness **विपर्ययः** reverse, inversion **कालपर्ययः** passage of time **प्रियवादः** pleasing words.

**(Fem.) :** **पीडा** unhappiness, pain **शत्रुता** enemity **मित्रता** friendship **प्रीतिः** love, affection

**(Neut.) :** **कारणम्** cause, purpose

**Pronoun :** **एतत्** this (neu.) **अस्मिन्** in this (masc. or neu.) **यस्मिन्** in which (masc. or neu.) **मे** my **ये** those (masc.) **तेषाम्** their (masc. or neu.)

**Adjective :** **वेदितव्य** worthy to be known **विज्ञेय** worthy to be known **सुसूक्ष्म** very minute **सम्मत** acceptable **सन्धित** associated **बलवत्तर** very powerful **द्वेष्य** to be hated **अपर** another **प्रध्वस्त** destroyed, ruined

**Adverb :** **हि** really **जातु** proper

**Compound :** प्राज्ञसम्मतम् (प्राज्ञानां सम्मतम् प्राज्ञसम्मतम् । षष्ठी तत्पुरुष) । कामक्रोधवशम् । (कामः च क्रोधः च इति कामक्रोधौ, (इतरेतर, द्वन्द्व) । कामक्रोधयोः वशः कामक्रोधवशः, तम् । षष्ठी तत्पुरुष) कालपर्यये (कालस्य पर्ययः कालपर्ययः, तस्मिन् । षष्ठी तत्पुरुष) । मन्त्रहोमजपैः (मन्त्रः च होमः च जपः च मन्त्रहोमजपाः, तैः । इतरेतर द्वन्द्व) । आत्मरक्षणतन्त्राणाम् (आत्मनः रक्षणम् आत्मरक्षणम् (षष्ठी तत्पुरुष) । आत्मरक्षणस्य तन्त्रम् आत्मरक्षणतन्त्रम्, तेषाम् । षष्ठी तत्पुरुष) । स्वदोषजाः (स्वस्य दोषः स्वदोषः (षष्ठी तत्पुरुष) । स्वदोषात् जायन्ते इति स्वदोषजाः, उपपद तत्पुरुष) ।

**Root : (First Gana) :** (Atmanepada) **वि+नि+वृत्** (विनिवर्तते) to turn back

**(Fourth Gana) :** (Atmanepada) **विद्** ( **विद्यते** ) to be **जन्** ( **जायते** ) to be born / produced

## Notes

**(1) Meaning :** **वेदितव्यानि** worthy to be known, should be known **दृश्यते** is seen **आपद्** difficulty, adversity **शत्रुरूपा:** to be like enemies **मित्ररूपा:** to be like friends **न बुध्यन्ते** can not be known **जीवति** when alive (locative absolute) **स्यात्** may happen **एति** goes, attains **कस्मिंश्चित्** in a certain, in some **प्रियवादेन** due to the pleasant words **कार्यार्थम्** to fulfil the work **प्रीयते** is delighted **कारणान्तरे** to fulfil other purpose **आत्मरक्षणतन्त्राणाम्** of independent people for one's protection **सुपरीक्षितकारिणाम्** of those who work after careful examination **आपद:** difficulties **नोपपद्यन्ते** do not occur **विजानाति** knows very well **बलीयस:** to powerful **चाल्यते** is moved **शास्त्रार्थकृतनिश्चया** decided on the basis of meaning of Shastras.

